वाग्भट्टालंकारः व्याख्यासहितः

५०६

[illegible]

काव्यं

वाग्भटालंकार

पत्रे ६५

ॐ श्रीगणेशाय नमः श्रीवर्द्धमानजिनपतिरनन्तविज्ञानसंततिर्जयति यद्गीः प्रदीपकलिकाकलिकालतमः
प्रमं नयति २ वाग्भटकवीन्द्ररचितालंकृतिसूत्राणि किमपि विवृणोमि मुग्धजनबोधहेतोः स्वस्य स्मृतिजन॰
नहेतवे च ३ इह शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्त्तमाना अभीष्टदेवतानमस्कारपूर्वकमेव वर्त्तन्ते इह शिष्टसमयप
रिपालनाय तथा श्रेयसि बहुविघ्नानि भवंति महतामपि श्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः १ इ
ति वचनात् मा भूदस्य शास्त्रस्य काव्यार्थिनां सम्यक् ज्ञानोपदेशकतया श्रेयोभूतस्य कोपि विघ्न इति विघ्नोप॰

ॐ श्रियं दिशतु वो देवः श्रीनाभेयजिनः सदा मोक्षमार्गं सतां ब्रूते यदागमपदावली १ ॥

शांतये च शास्त्रारंभे अभीष्टदेवतानमस्कारं महाकविः श्रीवाग्भटः प्रकटयति व्याख्या श्रीनाभेयजिनः
श्रियं दिशतु इति । स्पष्टरूकोद्घटना नाभेरपत्यं नाभेयः इतश्चानिञ इति संबंधे टक् श्रियायुक्तो नाभेयः
श्रीनाभेयो मयूरव्यंसकादेयश्च इति मध्यमपदलोपी समासः श्रीनाभेयश्चासौ जिनश्चेति कर्मधारयो दीव्यति
दिव्यकेवलज्ञानश्रिया इति देवः एतेन भगवतो ज्ञानातिशयः सूचयाचक्रे श्रीनाभेय इत्यनेन श्रिया अष्टम

ह्मप्रातिहार्यादिलक्ष्म्याउक्तस्वप्रतिपादनेनप्रभोः पूजातिशयः प्रत्यपादि जयति रागद्वेषादिरिपून् प॰
राभवतीतिजिनः अनेनपरमेश्वरस्यापायापगमातिशयोज्ञापितः मोक्षमार्गमित्यादिनोत्तरार्द्धेनपुनःस्वामि
नोवचनातिशयः ख्यापितएवचत्वारोप्यतिशयाःप्रत्याप्यतेस्म यत्तदोर्नित्याभिसंबंधइत्युक्तेः सइतिगम्यते
ततश्चसश्रीनाभेयजिनोवोयुष्माकंश्रियंकल्याणलक्ष्मींददात्विति भावः सःकइत्याह यस्यभगवतःआगमपद
नोसिद्धांतवचनानामावलीश्रेणिः सतांविदुषामुत्तमानांमोक्षस्यमार्गंसम्यग्रत्नत्रयाराधनरूपंब्रूतेब्रवी
तिप्रकाशयतीत्यर्थः अथान्यस्यापिकस्यचिदागमस्यागमनस्यपदानिपादप्रतिबिंबानितेषांपंक्तिःदृष्टास
तीसंतापम्यानंप्रकटयतीत्युक्तिलेशः तथाशास्त्रादौत्रिविधानांदेवतानांस्तुतिःसंभवति समुचितायाः १ इ
ष्टायाः २ समुचितेष्टायाश्च ३ इति तत्रसमुचितायादेवतायाःस्तुतिर्यथा नीतिशास्त्रारंभेराजादेः कामशा॰
स्त्रारंभेवास्मरादेः १ इष्टायास्तुतिर्यथा रघुकाव्येशिवगौर्योः २ समुचितेष्टायाःस्तुतिर्यथा श्रीयोगशास्त्रा
रंभेमहावीरयोगिनाथस्येति ३ अत्रपुनःशास्त्रारंभेश्रीनाभेयजिननमस्कारेणाभीष्टदेवतास्तुतिंप्रचक्रेश्रीवा
ग्भटः अथवाश्रियोष्टमहाप्रातिहार्यलक्ष्म्याइनःस्वामीश्रीनःजिभीभये भीयतेइतिभेयं भावेयप्रत्ययात्इतियःभ

यमित्यर्थः नविद्यते भेयं संसारश्च मोहवं भयं यस्य सोऽभेयः जिनः श्रुतकेवल्यपि भण्यते तस्यापि प्रायो रागा
दिजयात् तन्निरासार्थमभेयस्यासौ जिनस्याभेयजिन इति एवंविधस्य सामान्यकेवल्यपि लभ्यते तस्य भव
भ्रमभयाभावात्तन्निराकरणार्थं श्रीनस्यासौ श्रभेयजिनश्च श्रीनाभेयजिन इति एवंविधस्य ईश्वरो भवतीति
सामान्येनार्हतीनमस्कारः कृतो भवति यद्वा काव्यप्रणेतृस्य सर्वेषामपि साधारणोपयोगित्वात् इत्येवमतेनापि
नमस्कारस्य लेशतो व्याख्या यथा श्रीर्विष्णुपत्नी नाभेरुत्पन्नत्वात् ब्रह्मापि नाभेयः कथ्यते विष्णोर्नाभौ कम
लेच विश्वकर्तृनिवास इति लोकोक्तिः तथा चाहुर्नाभिभूः पद्मभूरित्यादि तन्नामा जिनो विष्णोः पीतांबरो मा
र्गी जिनो ऊर्ध्वोदक इति चिंतामणिवचनात् ततश्च श्रीश्च नाभेयश्च श्रीनाभेयौ ताभ्यामुपलक्षितो जिनः सृष्टि
यं दिशत्वा मा ह्यव्ययमवधारणे स्वरणे वा किं विशिष्टः उदेवः उ शिवः इत्येकाक्षरनाममालावचनात् उ शंभुः
स एव पूज्यत्वाद्देवो यस्य स तथा यदुक्तं ब्रह्माच्युताभ्यर्चितपादपद्मो न पूज्यते किं मनुजैर्गिरीश इति न च नम
स्कारस्य विघ्नविघातकर्त्ते सामर्थ्यमुच्यते नमस्कारेण पुण्यमुपजायते पुण्येन विघ्नाः प्रतिहन्यंत इति यद्वा
पि च नमस्कारमंतरेणापि निर्विघ्नशास्त्रपरिसमाप्तिर्दृश्यते तत्रापि मानसिकः प्रणिधानरूपो यद्यत्र प
वेति सफलो नमस्कारव्यापारः इति प्रथमपद्यार्थः १॥

किंच तत्र मंगलमभिहितं नमस्कारवचनेनाभिधेयं चात्र शास्त्रे सम्यक्काव्यस्वरूपं संबंधश्चास्य वाच्यवाचकभावादिः
तथाहि एतच्छास्त्रं वाचकं सम्यक्काव्यस्वरूपं वाच्यं उपायोपेयभावो वात्र संबंधः वचनरूपापन्नं हीदं शास्त्र
मुपायः तत्परिज्ञानं चोपेयमिति प्रयोजनं चानंतरं शिष्याणां शास्त्रार्थपरिज्ञानं परं तु सम्यक्कवित्वलब्धिस्फू
र्त्या कीर्तिप्रभृतिश्चाचार्यस्य त्वनंतरं प्रयोजनं शिष्यानुग्रहरूपं परं तु तदेव पादिकमिदमुक्तं पारत्रिकं तु परंपरप्रयोजन
मुभयेषामपि निःश्रेयसावाप्तिरिति अतो यदुच्यते केनचिन्नारब्धव्यमिदं शास्त्रमभिधेयादिरहितत्वात् काक

मंगलं चाभिधेयं च संबंधश्च प्रयोजनं चत्वारि कथनीयानि शास्त्रस्य धुरि धीमता ।१ साधुशब्दार्थसंदर्भं
गुणालंकारभूषितं स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥२॥

दंतपरीक्षादिवत् इति तत्र किंचिदुक्त्वाभिधेयादिदर्शनात् ।१ प्रथममेवार्थसमर्थयितुं वक्ष्यमाणार्थपरि
च्छेदकमोहशमगर्भं काव्यफलमाह अत्र प्रस्तावाच्छिष्यः कर्त्ता गम्यते ततः शिष्यः काव्यं कुर्वीत कर्म काव्यमिति गः
नोतच्चाग्निमत्यये साधुः कुर्वीत विदधीत कस्यै कीर्त्तये यशसे इति फलनिर्देशः अत एव कुर्वीतेत्यत्र फलवत्कर्त्त
रि आत्मनेपदविधानं काव्यं किंविशिष्टं साधुशब्दार्थसंदर्भं वक्ष्यमाणेनानर्थकत्वादिना दोषेण रहितः शब्दः
साधुः अर्थश्च वक्ष्यमाणेन देशादिविरुद्धत्वादिना दोषेण विमुक्तः साधुर्भवति न तत्र साधू निर्दोषौ शब्दार्थौ यस्मिन्

संदर्भे स साधुशाब्दार्थसंदर्भो रचनायत्र तत्तथा साधुशाब्दार्थयोः संदर्भो यत्रेति विग्रहं कुर्वंति तत्र समासप्राप्तिरुक्तसू-
त्रे यह शाब्दार्थयोः संदर्भः शाब्दार्थसंदर्भः साधुः शाब्दार्थसंदर्भो यत्रेति विग्रहः कार्यः साधुशाब्दार्थ इत्यनेन च शा-
ब्दार्थदोषप्रतिपादको द्वितीयः परिच्छेदः सूचितः तथा गुणा माधुर्यादयो ऽलंकाराश्च शाब्दाः चित्रवक्रोक्त्यादयः
अर्थाश्चोपमादयस्तैर्भूषितमित्यर्थः अनेन च तृतीयो गुणपरिच्छेदश्चतुर्थश्चालंकारपरिच्छेदः सूचितः
तथा स्फुटाः काव्यानुकूलत्वेन प्रकटाया रीतयो गौडीयाद्याः पदरचनाविशेषाः रसाः शृंगारादयो वक्ष्यमा-
णास्तैरुपेतमन्वितं अनेन च चतुर्थपरिच्छेदः रीतिप्रतिपादनं ज्ञापितं पंचमश्च रसपरिच्छेदः सूचितः प्रथ-
मं पुनरर्थशिक्षापरिच्छेदः काव्यस्य चानेकगुणत्वेपि कीर्तेरेवग्रहणं प्राधान्यज्ञापनार्थं यावता हि काव्यत्वे-
यनं व्यवहारपरिज्ञानं अशिवोपशमं सहृदयानां चाह्लादं करोति इदमेव च कवित्वं कांतासम्मितभूतं का-
नेव सरसानापादनेन अभिमुखीकृत्य रामवद्वर्तितव्यं न रावणवदित्युपदेशं च विधत्ते इति तदुक्तं काव्यप्र-
काशे राजा श्रीमहकवीद्रेण काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कांतास-
म्मिततयोपदेशयुजे १ त्रिविधं हि शास्त्रं यथा प्रभुसम्मितं शाब्दप्रधानं वेदादि १ सुहृत्संमितं अर्थतात्पर्यवत्
पुराणादि २ कांतासम्मितं चोक्तलक्षणं विशिष्टकाव्यादि इति एतद्विपरीतेन तु काव्या विपरीतफलमेव स्यादिति

अथकवित्वस्योत्पत्तयेसामग्रीमुपदिशन्नाह सर्वंहिवाक्यंसावधारणमामनंतीतिन्यायात् प्रतिभैवतस्यका-
व्यस्यकारणंहेतुर्भवति नवनवबोधप्रकारशालिनीबुद्धिर्नवनवोल्लेखशालिनीप्रतिभामताइतिवच-
नात् ननुयदिप्रतिभैवकाव्योत्पत्तेर्बीजंतदाव्युत्पत्तिःकिंकरोतीत्युच्यते तस्यकाव्यस्यप्रतिभयाजन्यमानस्यव्यु-
त्पत्तिर्भूषणमलंकारोभवतीत्यर्थः अभ्यासस्तुपुनःपुनस्तदासेवनलक्षणस्तस्यकाव्यस्यभूषणोत्पत्तिंकरो-
तिभूषणोत्पत्तिकृद्भवति अभ्यसनेहिसततःस्थैर्यादेर्योगात्त्वविलंबकाव्योत्पत्तेः एवंप्रतिभाव्युत्पत्त्यभ्यासा-

प्रतिभाकारणंतस्यव्युत्पत्तिस्तुविभूषणं। भृशोत्पत्तिकृदभ्यासइत्याद्यकविसंकथा ३ प्रसन्न-
पदनव्यार्थयुक्त्युद्बोधविधायिनी स्फुरंतीसत्कवेर्बुद्धिःप्रतिभासर्वतोमुखी ४॥

नांवर्णनामपिस्वस्वविषययाथार्थ्येनप्रदर्शितः इतिपूर्वोक्तप्रकारेणाद्यानांकवीनांसंकथाउपदेशः
३ अथग्रंथकारःप्रतिभाव्याख्यानमाह प्रसन्नेति प्रसन्नानिप्रक्लिष्टानियानिपदानि तथानव्याभिन-
वायार्थयुक्तिः ततःप्रसन्नपदानिचनव्यार्थयुक्तिश्चप्रसन्नपदनव्यार्थयुक्तयःतासामुद्बोधायउल्लास-
स्तंविदधातीत्येवंशीलास्फुरंती प्रसरद्रूपासर्वतोमुखंयस्याःसातथासर्वव्यापिनीसर्वाङ्गीणेत्यर्थः एवं

कविकल्पलताटी ॥ ५

वा·
अ· टी·
४
५

अथ व्युत्पत्तिं व्याविख्यासुराह शब्देति शास्त्रशब्दस्य प्रत्येकं सर्वंबंधात् शब्दशास्त्रं व्याकरणं धर्मशास्त्रमागमः अर्थ
शास्त्रं चाणिक्यप्रणीतो राजनीतिग्रंथः कामशास्त्रं कोकवात्स्यायनादिग्रंथः आदिशब्दात् छंदोलंकाराभिधान
चिंतामणिगजाश्वरत्नपरीक्षादिशास्त्राणि वेदाहादिदर्शनाभिधायकशास्त्राणि च गृह्यंते अत्र शब्देत्यादिद्वंद्वे कृते श
ब्दधर्मार्थकामा आदौ येषां ते शब्दधर्मार्थकामादयस्तेषां शास्त्राणि इति समासविधिः एतेषु सर्वेषु आम्नायाः पू
र्वं यस्याः सा आम्नायपूर्वा स्वार्थिके कप्रत्यये आम्नायपूर्विका गुरुपारंपर्यमूलेत्यर्थः असामान्या निःसमाना प्र

शब्दधर्मार्थकामादिशास्त्रेष्वाम्नायपूर्विका प्रतिपत्तिरसामान्या व्युत्पत्तिरभिधीयते ५ अनारतं गु
रूपांते यः काव्ये रचनादरः तमभ्यासं विदुस्तस्य क्रमः कोप्युपदिश्यते ६॥

तिपत्तिः परिज्ञानविशेषो व्युत्पत्तिः प्रोच्यते ५ शब्दशास्त्रे प्रवीणो हि कर्तृव्यक्रियापदविन्यासः निःसंशयेन भ
वति धर्मशास्त्रादिपरिज्ञानरहितश्चेत् तत्संबंधेषु धर्मार्थकाममोक्षादिकार्यजातमुदाहर्तुं न शक्नोति कथं कवि
र्भवतीत्यभ्यासमाह अनारतमिति निरंतरं गुरुपार्श्वे यः काव्यविषये रचनादरो भवति कवयस्तमभ्यासं विदुः
निश्चितत्वेन जानंति एतेन यः कदाचिदेकवारमप्यभ्यसनमात्रमभ्यासः सोभ्यास एव भवतीति ज्ञापित
तस्य पूर्वोक्तस्याभ्यासस्य कोपि किंचिन्मात्रः क्रमः इति भावः ६ ॥

क्रमप्रकारउपदर्शयति तमेवाह विभ्रत्येति काव्यायकाव्यंनिष्पादनायनिखिलानिछंदांसिमंडवृत्तादीनि वशी
कुर्यात्तत्त्वार्थीनानिकुर्वीकया पद्यनामावलीश्रेण्यातयाकिंविशिष्टया अर्थस्पष्टान्यथाभिधेयरहितया पीत
यः तथाबंधस्यसंदर्भस्यचारुत्वंमदृपदपद्धतियोगेनमनोज्ञत्वं विभ्रत्याधारयंत्याधाह यो ह्रि प्रथमम भ्या
सत्वाटपर्णपुनः काव्यनिष्पत्तिरिति विशिष्टकाव्यार्थिभिरभ्यासोपिसल्ललितपदवर्णाद्यामाधुर्यविशि॰

विभ्रत्याबंधचारुत्वंपदावल्यार्थस्पष्टया वशीकुर्वीत
काव्यायछंदांसिनिखिलान्यपि ७ ॥

ष्टपववियेयः अत्रचोदाहरणमुच्यते देवश्रेणीकीर्तिविस्फूर्तिरेणीयर्मीयर्मप्राप्तयेयर्म्मीमानः वि
स्वाधानमन्यमानः समानंमाहत्तेह्यरोहिणीवप्रदीपा अतपातलिन्यभ्यासोर्थसंबंधस्पष्टान्ययाप्यपिपाह
श्रेण्यापवमसर्वाण्यपिछंदांसिसार्थकैर्निरर्थकैर्वापाह्वबंधैरभ्यसनीयाइति ७॥

बा·
स·टी
५
5

अथ बंधचारुत्वमेव कथं भवतीत्याह पश्चादिति संयोगवशात्पश्चात्स्य वर्णस्य गुरुत्वं कार्यमेवं हि बंधस्य दार्ढ्यं
भवति तथा विसर्गलोपो न कार्यः यतो विसर्गाणामवस्थानेन काव्ये उतोगुणः उपजायते तथा विपाह्लो वि
रूपत्वे ऽभावे च वर्तते यथा विस्वरोयं गायनः विमदो मुनिरयमिति च ततो ऽत्रापि विरूपः संधिर्विसाधिः य

पश्चाद्गुरुत्वसंयोगाद्विसर्गाणामलोपनं विसंधि
वर्जनं चेति बंधचारुत्वहेतवः ८ ॥

ह्या न संधिर्विसंधिरिति विरूपसंधेश्च वर्जनं कार्यं एवंप्रकारोऽन्येपि उच्छवद्दपंक्तिष्ट पदवर्जनादयो बंधचारुत्व
स्य हेतवो भवंतीति प्रकारार्थ इति शब्दः सूचयति अत्रोदाहरणं निपीय यस्योदितिरदिताः कथां तथाद्रियंते न
बुधाः सुधामपि नलः सितच्छत्रितकीर्तिमंडलः स राशिरासीन्महसां महोज्ज्वलः १ उदाहरणमन्वये उक्तं ८

५

व्यतिरेके तु शेषकार एवोदाहरति षितेनइति त्वणामर्थीषोन्नर्थीषः संबोधनेन्नर्थीषानेवं इत्वयाषितेती॰
हेलकृपाणे खड्गे यादितेसति अत्र एव रणे संग्रामे घोरे रौद्रे त्वयाहते सति क्षितिपाः प्रत्तवान् षात्र वोन्त॰
पाभयेन वने कानने एवगताः नन्तरणमस्थितुहेस्थिताइतिभावः जवात् वेगात् अनेन सातिषायं भयं
व्यज्यते अत्र विहृते त्वयाइत्यादौ संयोगवषात् सर्वस्य गुरुत्वं नास्ति किंतु सदृजं विभक्तिकृतं अर्थीषे

षितेकृपाणे विहृते त्वया घोरे रणे कृते अर्थीषु क्षितिपाभीत्यावनमेवगताजवात् ९ अत्र तु॰
हलसंत्यांनत्वार्थयुक्ताव भिनववत्वतः अर्थसंकलनात तत्व मभ्यसेत्संकथास्वपि १०॥

स्वरविदूपसंधिः क्षितिपाभीत्याइत्यत्र विसर्गाणां लोपोस्ति एवमेभिर्दोषैरस्मिन् बंधपौष्ठित्यादि आमे
नास्ति बंधचारुत्वं अतो विशिष्टकाव्यार्थिभिरभ्यासोपि बंधचारुत्वेप्येतस्याएव पदावल्याकार्यः इ
तिस्थितं ९ अथार्थविशेषं विनापि पद्यबंधाभ्यासमाह अन्तहलसंत्यामिति परस्परालापेषु धःप्यभ्य॰
सेत् कस्यामसत्यामित्याह नव्यार्थयुक्ता अभिनवायामर्थयुक्तौ अन्तहलसंत्यां असङ्कतत्वामित्यर्थः नव्या
र्थयुक्तेरलाभः अतइत्याह अभिनववत्वतः कवेर्नवीनत्वादित्यर्थः १०॥

वा॰
रम॰ टी॰
९
6

अत्रोदाहरति यथा यच्छेति दृष्टांतोपदर्शनार्थः हे मित्र त्वया आगम्य तां तदा गाढं त्वं मां आलिंग्य आश्लेषं कृ
त्वा अत्र स्थाने त्वं निषीद उपविश आलिंग्यात्र पाठे तु सखे त्वं मां आलिंगनं कुर्वित्यर्थः तथा यन्निजभ्रातृसं
लग्नाया जायया अथवा निजभ्रातृजायया संदिष्टमस्ति स्वभ्रातृजायया यायः संदेशो मम ज्ञापितोऽस्तीत्य
र्थः तत्संदिष्टं निवेदय ज्ञापय त्वं ननु कथं भ्रातृजायेति सिध्यति यतोऽत्र योनिसंबंधसद्भावात् अतो विधा

आगम्य तां सखे गाढमालिंग्यात्र निषीद च संदिष्टं
यन्निजभ्रातृजायया तन्निवेदय ११॥

योनिसंबंधे ऋतिसूत्रेण षष्ठ्यलुक्प्राप्तेः भ्रातृजायेत्यलुक्समासः प्राप्नोति मातुःष्वसेत्यादिवत् उच्य
ते भ्रातेव भ्राता वयस्य इत्यर्थः ततश्च भ्रातृपदस्य मित्रार्थत्वादत्र योनिसंबंधस्याभावात् अलुक्समा
सस्याप्राप्तिः तथा च चमत्कारो भवति समानेन सह भ्रातृत्वमस्ति मम सखित्वमित्यर्थः ११॥

९

ननु यदि नव्यार्थयुक्तिरचनोल्लसति तदा परकाव्यार्थमादाय किमित्यभ्यासो न विधीयते अत्याशंकापनोद-
नार्थमाह परार्थेति वषाद्वात्र पुनरर्थे यः पुनरभ्यासः परेषां कवीनां गृहीतस्यार्थस्य बंधाद्भवेत् अभ्या-
सः किंविषयइत्याह वाच्यसंगतौ वाच्यस्यार्थस्य संगतौ संघटनायामित्यर्थः अत्र विषयसप्तमी तेनायमर्थ
संबंधविषयेयोभ्यासो भवतीति भावः सोभ्यासः न श्रेयान् प्रशस्यो न भवति यस्माद्धेतोरनेन परार्थबं-
धेन अथवा परार्थबंधात् क्रियमाणेनार्थविषयाभ्यासेन कविः काव्यकर्त्तातस्करस्तस्करो भवति उक्तंहि

परार्थबंधाद्यस्त्वस्यादभ्यासो वाच्यसंगतौ स न श्रेयान् यतोनेन कविर्भवति तस्करः ॥१२॥

परस्य काव्यं स्वमिति ब्रुवाणो विज्ञायते ज्ञैरिह काव्यचोरः विलोक्य माणिक्यमयोग्यदत्तं प्रत्येति को ना-
म यदेतदस्य वाच्यसंगताविति प्रतिपादनात् प्राक्तु संगतिविषयोभ्यासः परतोपि गृहीतोपि न स्तेयं सू-
चयतीति तथा परार्थबंधप्रसक्तः कविः स्वयमन्नाभिनवार्थोपपादनेक्लिमपते ततश्च पराण्यपि नववर्ण्य-
विषये वर्णनायामशक्तः सन्नुपहास्यः स्यात् कीर्त्यर्थं च काव्यविधाने विपरीतफलमेव भवेदिति ॥१२॥

वा॰
भ॰ टी॰
८

समस्यायां पुनः परार्थग्रहणं न विरुद्धं विशेषतस्तथा वै उख्याति माघदर्पणादिति तथैव चाह परेति समस्यायां पर
काव्यग्रहोपि विशिष्टबुद्धिप्रकाशनलक्षणगुणाद्धेतोर्गुणः स्यात्कवेः काव्यकर्तुरित्यर्थः अत्र परकाव्यग्रहणे
न परकाव्यस्यैको वा द्वौ वा त्रयो वा पादा ग्राह्याः न तु संपूर्णं काव्यं परकाव्यग्रहणस्य गुणत्वे हेतुमाह हि यः
स्माद्धेतोरसौ समस्यापूरकः कविस्तस्य परकाव्यस्य योर्थस्तस्यानुगतं अनुयायिनमनुकूलमित्यर्थः अतस्त
वैनवं निजप्रतिभाप्रागल्भ्येनाभिनवं रचयति एवं च समस्यापूरणे परकाव्यार्थमपि निजनिर्मलबुद्धिबलोत्पादिता

परकाव्यग्रहोपि स्यात्समस्यायां गुणः कवेः अर्थं तदर्थानुगतं नवं हि रचयत्यसौ १५ ॥

निभावार्थेन योजयन् कविश्चमत्कारकारको भवतीति समस्योदाहरणं यथा केनापि पृष्टः पादोर्पितः कज्जलं जय
ति कुंकुमोपममिति एतदर्थसंगत्यर्थं पादत्रयं नवं विधेयं यथा मानती भगवता भवं दत्ते पार्वतीपतिमतिभ्रमदखा
रक्तमद्रिविद्रपे रुचास्य तत् कज्जलं जयति कुंकुमोपमं १ स्वामिदेवाज्ञार्पितपादत्रयं कुमारसंभवस्य प्रथमश्लोकसमक
यथा वकारमेनाविरहातुरांगी प्रवालशय्याशयनं शरीरं हिमालयो नाम नगाधिराजः इति तुर्यपादेन पूरणेन च
कारमेनाविरहातुरांगी प्रवालशय्याशरणं शरीरं हिमालयो नाम नगाधिराजस्तव प्रतापज्वलनाज्जगाल इत्यादि

अथ काव्यनिमित्तमर्थोत्पत्तिविषयसामग्रीमाह मनःप्रसत्तिरिति सकलाधिविगमनात्मनसः प्रसन्नता बुद्धिन-
वनवोल्लेखशालिनी प्रतिभा प्रातःकालस्योपलक्षणत्वादपररात्रादिवेलापि ज्ञेया तत्र हि मंदमेधसो मे-
धाप्रसीदतीति अभियोग उद्यमोस्यास्तीति अभि तद्भावोभियोगिता नानाशास्त्रप्रदर्शनशीलत्वंच अत्रसमत्व·

मनःप्रसत्तिः प्रतिभा प्रातःकालोभियोगिता अने
कशास्त्रदर्शित्वमित्यर्थालोकहेतवः १७ ॥

यार्थस्वशब्दोनुक्तोपिगम्यते अथात्र अहरहर्दर्शनीयमानोगाम्भीर्यंउत्कर्षंपश्यं वैवस्वतोनरप्यातिस्तरयाश्व
दुर्मतिः १ इतिसर्वोक्तार्थालोकस्यार्थप्रकाशस्य हेतवो भवंति १८ ॥

किंच वर्णपिवस्तुपरीवारं टङ्कावयमन् विशेषणैः वाक्यैर्वास्तुकविर्भूयाउन्नतार्थोपमादिभिः अथसमस्तपन्नस्यार्थस्यनिवे
शनविषयेशिक्षामाह समासमिति कविरर्थस्यप्रकाशनं पूर्वार्थेकाव्यस्यसमासमिवसमासमुख्यार्थंविदध्यात्
नतुसमासमेवउत्तरार्द्धेतुउपमायांतुरन्यासादिप्रकारैरर्थस्फुरणंकार्यमित्युक्तप्रर्वंपुनः शिक्षांतरमाह कुर्यादि
ति क्रियानुवर्ततेतत्पुरुषस्यबहुव्रीहेश्चमिथःप्रत्ययमावहन्तइति मिथःप्रत्ययावहौतौपरस्परंप्रतीतिकार
कौनकुर्यादित्यर्थः यथाहरपादुरित्युक्तेहरः पादुर्यस्येति बहुव्रीहौसत्यपिहरश्चासौपादुश्चेति तत्पुरुषसं

समासमिवपूर्वार्द्धेकुर्यादर्थप्रकाशनं तत्पुरुषबहुव्रीहीनमिथःप्रत्ययावहौ १५॥

प्रतीतिःस्यादेवंवीरपुरुषइत्युक्तेवीरश्चासौपुरुषश्चेतितत्पुरुषसमासः वीराःपुरुषायत्रग्रामेइतिबहुव्रीहि
प्रतीतिःस्यात् एवंनकार्यं ननुहरश्चासौपादुश्चेत्यसौतत्पुरुषस्येष्वत्रचकर्मधारयसद्भावात्तत्पुरुषस्यप्रां
तिरयुक्तास्येतिचेत् मैवंकर्मधारयस्याधिकारेतत्पुरुषसंज्ञायाअपिवैयाकरणैःप्रतिपादनात् ततःक
र्मधारयस्तत्पुरुषसद्भावस्तस्मात्तत्पुरुषभ्रांतिरुक्ता अनुष्टुभिसर्वोनायादिवचनान्मित्रिपिन्दोसौकारे
नगणपादस्तत्पुरुषबहुव्रीहीउन्यत्रनविरुद्धःस्यात् १५॥

अस्याशिक्षापदस्य त्वादिहेतुभिः पुनः शिक्षान्तरमाह एकस्यैवेति कविः एकस्यैव एकस्यापि अभिधेयस्यार्थस्य
समासं लघुनिर्छेदसिसंक्षेपं व्यासमेव च विस्तरमपि च कर्त्तुं विधातुमभ्यसेत् शिक्षयेत् लघुछंदसार्थस्य संक्षे-
पं कर्त्तुमभ्यसेत् प्रौढछंदसार्थस्य विस्तरमपि कर्त्तुमभ्यसेत् तथा कविरभ्यसेत् किं कर्त्तुमाधानं कर्त्तुम-
र्थस्य स्थापनां कर्त्तुं कास्तु निःशेषालंकियास्तु सर्वालंकारेषु अयं भावः सर्वेषामप्यलंकाराणां रूपमादिश्यैक

एकस्यैवाभिधेयस्य समासं व्यासमेव च अभ्यसेत्कर्त्तुमाधा
नं निःशेषालंक्रियास्व १८ ॥

स्याप्यर्थस्य स्थापनां कर्त्तुं वाभ्यसेदित्यर्थः प्रौढस्याप्यर्थस्य लघुछंदसा समासो यथा एकत्राधनिम
तिधानमुखरास्तद्विसृन्मयात् लीयमानान्निकुंजेषु वारयन्तीव पर्वताः १ अस्यैवार्थस्य व्यासो यथा या
नं भ्रमयानकानकप्रातध्वानप्रतिध्वानितो हृस्वोच्छेदपराभवागममभीसंभाव्य शोकाकुलाः नासावेश
वशाहताततनपुनाव है रिराजव्रतं हृत्वा देवानितकरिसवः स्वस्वामिन् विभान्त्या इयः

अथवा ज्योत्स्नागंगापरब्रह्म उग्ययाराहुयांशुभिः द्वाराश्चापिनरोवंतेयदिते द्वयः अयं समासोऽस्यैव॰
व्यासो यथा ज्योत्स्नास्निग्धाननोवाद्वराति द्वयशिरोरद्धि॰णी ॰ तरद्धि॰णीपांनेदब्रह्मरम्यनभवति मधुरा
नाप्यसौ उग्रयुथारा मुग्धा उग्रपांशुथेनौ विलसति लदरी द्वारिणीवानद्वाराः मन्यथा स्वर्गङ्गंगङ्गणस्म
चरणाः कीर्तयेश्वत्वदीयाः २ तथाहिःपोषालंकारेष्वर्थनिधाने विषयेभ्यासो यथा स्वखमस्याः खंदं मि
त्येतावन्मात्रोर्थः मुखकमलसुंदरामितिरूपके आधीयते ॰ स्यामुखेषट्पदावलिः कमलभ्रान्त्या लिप
ततीति भ्रांतिमदलंकारे ॰ स्यामुखेवदितेविधाशावंदः किमर्थं निष्पादितः इत्याक्षेपे इदमेव स्या मु
खमथवा पद्ममिति संशयालंकारः इदं मुखं किंतु कमलमित्यपह्नुतौ अनलंकृत सभग स्या मु
स्त्रियामुखमिति भावनीयं अस्याश्रवस्यावदनेन कांतिभिन्निराकृते विलासभवनतमो भवेनस्मर
तिप्रदीपं परिजनइत्यतिशयेपद्मालंकारेषूपकपर्वार्थोऽभ्यसनीयः १८॥

अर्द्धस्यांतः अपर्यन्तः पादस्यांतः पादान्तः अस्मात् जवदर्हितपादांते हिंतद्रूपे पादांते लघुर्वर्णो गुरुर्भवति किं
तु अर्द्धांतपादे प्रांते पि लघुर्वर्णो गुरुर्भवति कस्मिन् सति प्रोथित्वे सति पिपायिलस्य भावः प्रोथित्वं न प्रोथित्वम
प्रोथित्वं तस्मिन् च यस्य दफते सतीत्यर्थः तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ तुभ्यं नमः क्षितितलामलभूष
णाय तुभ्यं नमस्त्रिजगतः परमेश्वराय तुभ्यं नमो जिन भवोदधिशोषणाय एवंविधे छंदसि वसंततिलका छंद
वत्रादिछंदः स्वचंधस्य दफते सति प्रथमतृतीयपादांते पि लघुगुरुः स्यात् नतुन मालिनीप्रभृतिछंदस्य

स्यादनर्हितपादांते प्रोथित्वे लघुर्गुरुः पादादौ न च वक्तव्याश्चादयः प्रायशो बुधैः ९ ॥

प्रोथित्वसंभवात् तथा बुधैः पादस्यादौ चादयो न वाच्याः यथा च नौमि निमिसुविधिं पार्श्वमित्यादि प्रयोगद
र्शनात् रेफिक्वाकिनश्चाः प्रभृतयो न इष्टाः यथा रे रात्रसा कथयत क सरावणो यो रत्नरवी उकूलयोरपहृ
त्य न ह्यत्र इति याचितयामि सततं च मदमयि सा विरक्ता सा प्यन्यमिच्छति जनं स जनो न्यसक्तः अस्मत्कृते च प
रितुष्यति काचिदन्यादिक तां च तं च मदनं च इमां च मां च इति आः सर्वतः स्फुरति कैरवमापिवति ज्योत्स्नाकषा
य मधुरीमधुनावकोरः जातोपसे प चलचूल तु वीपकेरु दत्यकरजागरणप्रदीपः स्वयमप्यूहनीयं ९ ॥

वा·
ग·म·टी·
१०

अथ कविसमयं सिद्धांतमाह कविर्विख्यानिकाखेत्रीणि त्रिं भुवनीयात् स्वर्गमर्त्यपाताललोकभेदात् अथवा सप्त यथा भूर्लोक १
भुवोलोक २ स्वर्गलोक ३ महर्लोक ४ जनलोक ५ तपोलोक ६ सत्यलोक ७ इति यद्वा चतुर्दश यथा सप्त पूर्वा अपि तलं ८
वितलं ९ सुतलं १० महातलं ११ तलातल १२ रसातलं १३ पातालं १४ इति मतांतरेण भुवनान्येकविंशतिरपि तथा यद्य
पि शुक्लत्वादयो गुणा मूर्तिमद्द्रव्याश्रयाः तथापि कीर्तिमद्यशाम मूर्तामपि सितां श्वेतां निबध्नीयात् अट्टहास मप्य
कीर्तितत: श्वेतकीर्तेरन्यथा अपर प्रकारा मसितां कृष्णामित्यर्थः निबध्नीयात् १८ यद्यपि द्रष्ट्रिनो वर्णः कृष्णस्तथा·

भुवनानि निबध्नीयात् त्रीणि सप्त चतुर्दश वा अट्टहास प्रकांसितां कीर्तिमकीर्तिं च ततोन्यथा १८ वारसं शुभ्र
मिंद्रस्य चतुरः समुद्रांश्चतुर्थीन् चतस्रः कीर्तयेद्दिशो दशवा क्रमः क्वचित् १९ ॥

पि सुरेंद्रस्य गजं शुभ्रं कीर्तयेत् अप्रस्य तरंगमारं नीलो वर्णः [illegible] स्वयमूहनीयः प्रेशु
धीन् वर्णयेत् कृतिचतुः संख्यान् पूर्वपश्चिमदक्षिणोत्तर समुद्रभेदात् लवणः १ क्षीर २ दधि ३ आज्य ४ सुरा
५ इक्षु ६ स्वादुवारि ७ सप्तसमुद्ररूपो लोकप्रसिद्धान् तथा क्रमादिशः कीर्तयेत् कृतिचतस्रः अथवाष्टौ य
द्वा दश वा सर्वशपि दिशः [illegible] कविलक्ष्यानेकाव्याप्य योगिनि पूर्वपश्चिमदक्षिणोत्तर [illegible] चतस्रो दिशः व
तस्रः विदिशः अवेपा [illegible] ऊर्ध्वदिग्योदिक अवनेपात् दश वापि दिशः [illegible]

पुनः शिक्षामाह यमकेति यमकालंकारे श्लेषालंकारे चित्रालंकारे वकारबयोर्न भित् न भेदो भवति पुनः क
योर्डकारलकारयोस्तथा अनुस्वारस्य विसर्गस्य च चित्रस्य हारबन्धछत्रबंधादिरूपस्य भंगाय विज्ञातायनसम्म
तोन कथिताविप्यर्थः २० अथ क्रमेणोदाहरणानि यमकेववयोर्डलयोरभेदो यथा शांकेति हेमद्वीपा

यमकश्लेषचित्रेषु बवयोर्डलयोर्न भित् नानुस्वारविसर्गौ च चित्रभंगाय संमतौ २० शांकमा
नैर्मद्वीपालकारागारविडंबनं त्वहै रिभिः सपत्नीकैः श्रितं बहुविडंबनं २१ ॥

लहिति पालत्वहैरिभिर्वनं श्रितं किंविशिष्टं बहूनि विडानि विलानि सर्पादिविवराणि यत्र तत्तस्तद्दप
त्नीभिर्वर्तन्ते इति सपत्नीकास्तैः किंभूतैः शांकन्ते इति शांकमानास्तैः किंक मतवकारारूपे आगारे विडंबनं उ
मिष्टं कदर्थनमित्यर्थः कारावासो आगारे चेति कर्मयारयः अत्र श्लोके यमकालंकृते विडंबने बहुविडंबनमिति ब

वा॰ श्लेषे ववयोरभेदो यथा त्वयेति स्वामिन् रिपूणां बालाः शिशवो केवलं त्वया न संयमिताः न केवलं त्वया बद्धाः वंदी
भ॰टी॰ कृता अयमर्थः किं तु तेषां रिपूणां कामिनीभिरपि वाला न संयमिताः अत्र वाला केशा न बद्धा इत्यर्थः त्वया हृदयाईण
११ सता न संयमिताः तत्कामिनीभिस्तु भर्तृवियोगभागिनीभिः सतीभिर्न बद्धा इति बाला शिशवो वाला अत्र केशाः किं
॥ विशिष्टाः मुहुर्मंहीपातविधूसरांगाः मुहुर्वारंवारमस्त्रोपातेन पतनेन विधूसरं विशेषेण धूलिमिश्रितं मलिनमंगं
येषां ते तथा अत्र बालवालशब्दयोर्बवयोरैक्यं ॥ श्लेषे डलयोरैक्यं यथा देवेति हे देव राजन् अनेकार्थनाममालाः

त्वयाद्याईण विभो रिपूणां न केवलं संयमिता न बालाः तत्कामिनीभिश्च वियोगिनीभिर्मुहुर्मंहीपात
विधूसरांगाः ॥ देव युष्मयशोराशिं स्तोतुमेनं जडात्मकं उत्कंठयति मां भक्तिरिंदुलेखेव सागरं ॥

यां देव प्राज्ञो राजार्थेष्वपि युष्माकं यशोराशिं स्तोतुं वर्णयितुं त्वदीया भक्तिर्मामुत्कंठयति उत्सुकं करोति य
नेऽयमं प्रत्यक्षं मां किं विशिष्टं जडआत्मा यस्य स जडात्मा जडात्मैव जडात्मकः स्वार्थे कः क इव यथेंदोर्लेखा रे
खा सागरमुत्कंठयति उल्लसितं करोति सागरमपि किं विशिष्टं जडात्मकं जलं नीरमात्मा स्वरूपं यस्य त
जलात्मकं तं तथा अत्र जडजलशब्दयोरैक्यम् ॥ ३ ॥

११

अथ विशेषणयोरैक्यं यथा चंद्रेडितमिति अहं देवं प्रणमामीति संबंधः कः चंद्रेण सकलज्योतिश्चक्रस्वामिना ईडितः
स्तुतस्तं पुनः किं वट्टलितस्वरथीनसाररत्नासनं स्वरश्चाह्वोऽयमलिनः स्वर्गाधीनो विख्यातो मेरुरित्यर्थः तस्य सारर
त्नमयं आसनं पादकंबलाशिलास्थितं वट्टलितं वर्तुलीकृतं स्वरथीनस्य मेरुशैलस्य साररत्नासनं येन स तं श्रीवीरं मे
रोःकंपनात्स्वासनमपि कंपते अथवा स्वः स्वर्गे तत्स्वर्गवासिदेवजनेनाधीतं पठितं व्यावर्णितं सारं बलं यस्य स स्वरथीनसा
रं इंद्र इत्यर्थः वट्टलितं कंपितं स्वरथीनसारस्य इन्द्रस्य रत्नासनं येन सः परमेश्वरस्य कल्याणकेषु इन्द्राणां सिंहासना

चंद्रेडितं वट्टलितस्वरथीनसाररत्नासनं रभसकल्पितशोकजातम् पापपाशिपापतिमिरक्षय·
(कारिकायमल्पेतरामलतपःकवलोपलोवं २४ ॥)

निकंपंते इति रभ सावेगेन कल्पितं छिन्नं शोकजा
तमसमाधिसमूहो येन स तं पुनः कथंभूतं पापान्येव तिमिराणि तेषां क्षयं करोति इति पापतिमिरक्षयका
रः पापतिमिरक्षयकारकः कायो देहो यस्य स तं अल्पेतरं च तदमलं च अल्पेतरामलं ततः पश्चात् तस्मै अल्पे·
तरामलतपसा कवलोपं कवानां केशानां लोपो पनयनं लोचयति दर्शयतीति अल्पेतरामलतपः क
वलोपलोवसाम् अत्र चंद्रेडित वट्टलित शाह्वयोः डलयोरैक्यं अदकाव्यं द्वारमातिख्यवाचनीयं २४ ॥

वा
भ·टी·
१२
12

विश्लेषवयोरैक्यं यथा प्रचंडेति प्रचंडमुत्कटं बलं वीर्यं यस्य स सं बोध्यः निर्गतः कामात्कंदर्पान्निष्कामः तस्यामं
त्रणं निष्कामेत्यत्र निर्दुर्बहिराविः प्रादुश्चतुराम् इत्यनेन सूत्रेण निःप्रादुस्यरेफः षो भवति परमत्र बाहुलकात्
चित्रार्थं षकारेण हतस्तेन विसर्ग एव निःकाम इति महागमः सार्वज्ञमतस्य प्रकाशितो महागमो येन स सं बोध्यः
भावोभिप्रायश्चित्तमित्यर्थः तस्य तत्त्वानि अंतरङ्ग· तत्त्वानि ज्ञानादीनि तेषां निधिरेव निधिस्तस्यामंत्रणं हे

प्रचंडबलनिष्कामप्रकाशितमहागम भाव
तत्त्वनिधे देव भालमाभाद्भुतैतव २५ ॥

देव भाप्रभाश्चलमतिशयेनात्रविस्मयेप्यद्भुताश्चर्यकारिणि अस्ति क्रियानुक्तापि गम्यते यत्रान्या क्रिया
पदं न श्रूयते तत्रास्तिर्भवंतिपरः प्रयुज्यते इति वृद्धवचनप्रामाण्यात् अत्र भावववयोर्वलयोरैक्यं तत्त्वस्थ
त्रस्थापनायांस्वयंज्ञेयं तथा चंडेडितमित्यत्रानुस्वारेणाविष्टभंगेन निःकाम इत्यत्र विसर्गाभ्यां न विष्टभंगः भ
वकानननमभेमभग्नमायातमः प्रभविनयाकाङ्क्षवेवीरविनतविदमोश्वर इदमपि छत्रकाव्यं कविहृदयपोत २५

१२

अथ पूर्वमेवार्थमुपसंहरन्नाह अधीत्येति अभियोगस्य उद्यमस्य योगाच्छास्त्राणि धर्मशास्त्रकामशास्त्रार्थ
शास्त्र शब्दशास्त्र वैद्यकशास्त्र ज्योतिःशास्त्रालंकारशास्त्रप्रभृतीनि अध्ययने पूर्वमधीत्य अर्थाश्च पदानि
च तेषां प्रपंचो अभ्यासेन वश्यो वशावर्ती अर्थपदप्रपंचः शब्दार्थप्रपंचो यस्य समस्तं तं प्रसिद्धं एवंविधं कविप्रमु

अधीत्य शास्त्राण्यभियोगयोगादभ्यासवश्यार्थपदप्रपं
चः तं तं विदित्वा समयं कवीनां मनःप्रसत्तौ कवितां विद
ध्यात् २८ इति श्रीवाग्भटालंकारे व्याख्यायां सिंहदेव
गणिकृतायां प्रथमः परिच्छेदः १॥

तं कवीनां समयं कविसिद्धांतं ज्ञात्वा तां मनसश्चित्तस्य प्रसत्तौ प्रसन्नत्वे सतीत्यर्थः कवेः कर्म कविता कवितां
तां विदध्यात् कुर्यात् २८ इति वाग्भटालंकारव्याख्यायां सिंहदेवगणिकृतायां प्रथमः परिच्छेदः १॥

वा॰
अ॰टी॰
१३
13

अथ काव्यशरीरं दर्शयन्नाह तस्य पूर्वप्रस्तुतस्य काव्यस्य एताः भाषाः कायतां शरीरतां यांति प्राप्नुवंति चतस्रोपि भाषाः काव्यस्य शरीरप्राया इत्यर्थः १ अथ भाषावैशिष्ट्यं स्फुटयति देवानां भाषा संस्कृतं भवति किंभूता शब्दशास्त्रेषु व्याकरणेषु निश्चिता सम्यक्कृतव्युत्पत्त्या निर्णीता प्राकृतं संस्कृतात् आगतं प्राकृतं अनेकप्रकारं भवति तज्जं च तत्तुल्यं च देश्यं च तज्जं तत्तुल्यं देश्यानि नानादेशेयस्य ततत्तथा तस्मात्संस्कृतात् जायते स्म तज्जम् यथा सिविसिद्धि

संस्कृतं प्राकृतं तस्यापभ्रंशो भूतभाषितं इति भाषाश्चतस्रोपि यांति काव्यस्य कायतां १ संस्कृतं स्वर्गिणां भाषा शब्दशास्त्रेषु निश्चिता प्राकृतं तज्जतत्तुल्यदेश्यादिकमनेकधा २॥

राय सहं साहसरसिइ ति कित्तणं तज्ज करमन्न दामरणंमह पडंतमयणाढमक्कमसि १ हे श्रीसिंहराज जयसिंहदेव तव साहसरसिकं इति कीर्तनं सत्यम् शक्तितत्त्रिया अन्यथा कथं मनो मम अश्रांतामसि मनाकिं भूतं पतंति मदनास्त्राणि स्मरबाणाः यत्र तत् अत्र संस्कृतशब्दा एव प्राकृतीभूताः इति तज्जं १ तेन संस्कृतेन तुल्यं समसंस्कृतमित्यर्थः उदाहरणं यथा संसारदावानलदा ॥

इनीरं इत्यादिस्तुतयः अत्र प्राकृतेपि संस्कृतशब्दानान्यथाभवतीति देश्येभवं देश्यं यथा सत्तावीसंजोय-
णकरपसरोजाव अज्जविनहोइ पडिहच्छविनगइवइभवयणोतावच्चउज्जारणम् १ अत्र सत्तावीसंजोयणशब्दो
देश्यपञ्चविंशत्यर्थे तस्यकिरणप्रसरोयावत् अद्यापिनभवति पडिहच्छशब्दोपि देश्यः सदृशार्थः गइवइ
शब्दोपिदेश्यपञ्चंद्रार्थः ततोदेसंपूर्णमण्डलचंद्रवदनेतावत् उद्यानं व्रजइति अतिशब्दात् शौरसेनीभाषा
मागधीचदृश्यते यतः शौरसेनीमागध्योः प्राकृतादल्पएवभेदः शौरसेनीयथा इदानींशब्दोह्राइल्लोपः जंदाणिं
इवलो अदस्तंतदशब्दस्यतातापादिएवशब्दस्यथ्येवइदयथेवनतुशब्दस्यथ्येव नतशब्दस्यणेणंभणामितम अ
स्मदेशब्दोहादर्षेयथा अस्मदेएसोवहलदोजणो विदूषकादीनांहर्षेहीहीभोइतिशब्दोः हीहीभोएसनत्रूपंजं
पइइत्यादि मागधीभाषायां अकारांतस्यसोएर्भवति सएवहलदे तथा देशब्दस्यचदेओभवति यथाद
गेम्नागदातिष्टतेस्तकारस्यचकारविदत्तमम् तथा रेकारस्यलः णकारस्यचनः
तथातकरणस्यानेतत्त्वनइतिरूपस्यानेतत्वकं इत्यादि
एवमनेनप्रकारेणानेकथाश्र
इतेत्तेयम् २॥

वा॰ अपभ्रंशभाषामाह अपभ्रंशः शुद्धर भवति सद इति स्वयं गम्यते यत्तेषु तेषु कर्णाटपञ्चालादिषु ष्टं अपर
भटी॰ भाषाभिरमिश्रितं भाषितं सोऽपभ्रंशो भवतीत्यर्थः । अदहकविदभूतोऽपि रेफो भवति यथा वारउ तह अइमाडि
१४ अउदी सदृस वयर तह कहिमाक अ ह अहश्रा विस ह अम्हं के रं कं तपैशाचीमाह यकिंविद्भूतैः पिशाचैः ।
15

अपभ्रंशस्तु यच्छुद्धं तत्तद्देशेषु भाषितं यद्भू
तैरुच्यते किंचित्तद्भौतिकमितिस्मृतं ३॥

च्यते जल्प्यते तद्भौतिकं पैशाचिकमिति कथितं भूतानामिदं भौतिकं अत्र दकारस्य तः यथा मातुते
वं तेवं मारुदेवं नमत इत्यर्थः हृदयस्य यकारस्य पकारो भवति यथा हितपकं पेङ्गनस्य लः यथा
लहणोइ ...र्थः इत्यादि ३॥

अथ वाङ्मयस्य द्विप्रकारत्वमाह तत्समिति इदं वा वां विकारो वा अयं द्विधा द्विप्रकारं भवति एकमात्रावर्णगणसंबंधा
त् छंदसा निबद्धं अपरं च अछंदः छंदोरहितं माद्यं छंदोबद्धाछंदसोर्द्वयं यत्र कथ्यते गद्यपद्यरूपम् तच्चंपूरि
ति मिश्रं गद्यपद्यमयी चंपूरितिवचनात् मिश्रं च नाटकादि एवं सर्वग्रंथेषु भवति ४ काव्ये दोषपरिहारा
र्थमाह तत्काव्यमदुष्टमेव दोषरहितमेव कीर्त्तिनिमित्तं भवति किं विशिष्टायै कीर्त्यै स्वर्गस्य स्वर्गारूपस्या

छंदोनिबद्धमछंद इति तद्वाङ्मयं द्विधा पद्यमाद्यं तदन्यच्च गद्यं मिश्रं च तद्द्वयं ४ अदुष्टमेव
तत्कीर्त्यै स्वर्गसोपानपंक्तये परिहार्यानतो दोषांस्तानेवादौ प्रचक्ष्महे ५ ॥

वासस्य सोपानपंक्तिरिव स्वर्गसोपानपंक्तिस्तस्यै यथा सोपानपंक्त्या प्रासादे उच्चैस्तरे आरुह्यते तथा कीर्त्ति
रूपसोपानश्रेण्या कवयः काव्यकरणेन स्वर्गलक्षणं तुंगप्रासादमारोहंति कविकीर्त्तेः स्वर्गेपि विस्तीर्ण
मानत्वात् अतः कारणात् परिहार्यान् दोषान् तान् प्रसिद्धान् आदौ पुरि प्रचक्ष्महे कथयामः वयं तत्र
काव्ये दोषा द्विविधा भवंति पददोषा वाक्यदोषाश्च तत्र प्रथमं पदविषयान् दोषानाह ५ ॥

ग्रम्यं न विद्यते ऽर्थः प्रयोजनं यस्य तदनर्थकं निःप्रयोजनमित्यर्थः १ श्रुतौ श्रवणे कर्णस्याति कटु यत् श्रव
णकर्कशमित्यर्थः २ विशेषेणाहतो विरुद्धोऽर्थो यस्य तत् व्याहतार्थं ३ विरुद्धार्थमित्यर्थः न विद्यते लक्ष
णं शास्त्रप्रसिद्धं व्युत्पत्तिर्यस्य तत् व्याकरणहीनमित्यर्थः ४ स्वसंकेतेनैव न परसंकेतेन प्रकल्पितोऽर्थो यस्य
तत् तथा स्वाभिप्रायमित्यर्थः ५ प्रसिद्धं कविशिक्षोक्तमपि यत् न प्रसिद्धं विख्यातं तत् अप्रसिद्धं ६ असंम
तं नाभिमतमित्यर्थः ७ ग्रामे प्रत्यंतग्रामे भवं ग्राम्यं ग्रामीणजनेवचनतुल्यमित्यर्थः एवंविधं यत्पदं प्रजा

अनर्थकं श्रुतिकटु व्याहतार्थमलक्षणं ४ स्वसंकेतप्रक्लृप्तार्थमप्रसिद्धमसम्मतं ७ ग्राम्यं
यच्च प्रजायेत पदं तन्न प्रयुज्यते क्वचिदिष्टा च विद्वद्भिरेतेषामप्यदोषता ८॥

येत प्रादुर्भवेत् तत्पदं साक्षात्रूपं न प्रयुज्यते काव्ये श्रुताद्यपास्य पदस्य दुष्टत्वात् अत्रापवादमाह क्वचिदिष्टा
वेत्यादि क्वचित् केषुचित् विदग्धवादोपहासार्थेषु विद्वद्भिः सर्वाचार्यैरेतेषामपि पूर्वोक्तदुष्टपदानामप्यदोषता
निर्दोषता इष्टा प्रतिपादिता इत्यर्थः यथा मुखं चंद्रस्प्रियं यत्ते सेतुसमगुकराङ्कुरैः अत्र हास्यरसो ग्राम्य
त्वं गतां गतं १ हास्यरसावतारादिहेतवे ग्राम्यादिपदान्यपि गुणा[illegible]य भवंतीति भावः ८ ५

तत्र प्रथममनर्थकमाह प्रस्तुतेप्यारब्धेः यैर्यदनुपयुक्तं न उपयुक्तमनुपयोगि भवति तत्पदमनर्थकमुच्यते उदा
हरणमाह यथा शाब्दोदृष्टांतोपन्यासार्थः अत्र लंबोदरपदं हि तु इति च सर्वमनर्थकं यतो यत्स्वरूपमात्रं वाचक
पादपूरणमात्रं च यत्तद्द्वयमप्यनर्थकं ज्ञेयं लंबोदरपदं हि स्वरूपमात्रवाचकं हि तु पदे च पादपूरणमात्रार्थे

प्रस्तुतेऽनुपयुक्तं यत्तदनर्थकमुच्यते यथा विनायकं
वंदे लंबोदरमहं हि तु ९ ॥

मतोनर्थकानि तथा वंदेऽत्यत्र वर्त्तमानाद्यायक वचनस्य प्रयोगादहमित्यपि स्वयं लभ्यते ऽतोहमिति पद
मिति पुनरुक्तत्वादनर्थकं ज्ञेयं प्रयोजनविवक्षायां त्वहमिति पदं प्रयुक्तं नानर्थकमित्यत्र शिष्य आह नन
लंबोदरपदं गणेशार्थप्रतिपादकं ततः कथमनर्थकं वाच्यं विनायकपदेनैव उक्तार्थत्वात् ॥

वा·
भ·टी·
१६
16

पुनरुक्तत्वदोषः स्यादिति पुनरुक्तदोषस्यात्र निषिद्धत्वात् अत्रोच्यते पुनरुक्तदोषात् अनर्थकदोषेंतर्भवंति ये
त्र पुनरुक्तदोषान् पृथक् निषेधंति तेपि पदार्थप्रतिपत्तौ जातायां पदांतरस्य प्रयोगमनुपयोगिनं मन्यंते त
एवं न चेद् प्रस्तुते दंतेपीत्यर्थे लंबोदरपदं किंचिदुत्कर्षं पुष्णाति तेन पुनरुक्तदोषो नर्थकदोषो नर्थकदोषेंतः
र्भवतीति सिद्धं यत्र वक्ता हर्षभयादिवशात् पदं द्वित्रिर्वा प्रयुंक्ते तत्र नायं दोषस्तेन विना हि कथं हर्षभयाद्यर्थ
प्रतीतिः स्यात् तदुक्तं श्रीआवश्यके सज्झायझाणतवोसहेसु उवएसथुइपयाणेसु संतगुण
कित्तणेसु अ न हुंति पुनरुक्तदोसा उ १ यथा जयजयवज्ररजिलोऽवतारभूपजयसिंह
अरिकेसाहस्तत्वास्तव्यापतिउर्वीरवीरभवनेस्मिन् अत्र जयजय
पादं विना हर्षो न गम्यते हस्तपादयोस्तु पुनरुक्ताभास
त्वमेव भिन्नार्थत्वाद्धयेयथा अद्रिरद्रि एवं
वीप्सानुवादादिष्वपि द्रष्टव्यम् ९॥

अथश्रुतिकटुमाह विद्वद्भिर्भूषकं करोरा त्वरारिणियत्तत्स्यं श्रुतिकटु इति पठितं उदाहरणमाह यथा प्राहेति
दर्शनापदर्शनार्थः इयं भुवतीसृष्टा विधात्रा घटिता किंभूतेन प्रकाशमनसावधानंमनो यस्य स प्रकाशमनाः ते
न मन्ये इति वितर्के एवंविधाद्भुतरूपस्यानुपपत्तेरिति अत्र सृष्टा इति कठोरं व्याहतार्थमाह १· नापरं व्याह
तार्थं भवति यदभीष्टार्थस्य बाधकमर्थांतरमन्यार्थमाश्रयति एकस्मादर्थादन्योऽर्थोऽर्थांतरमिष्टा·

तिष्ठादन्तरमत्यंतं बुधैः श्रुतिकटु स्मृतं प्रकाशमनसा मन्ये सृष्टेयं निर्मिता यथा १· व्याहतार्थं·
यदिष्टार्थबाधकार्थांतराश्रयं रतस्त्वमेव भूपाल भूतलोपकृतौ यथा ११॥

र्थंबाधकं च तदर्थांतरमिष्टार्थबाधकं च तदर्थांतरं च इष्टबाधकार्थांतराश्रयो यस्येति समासविधिः उदाह
रणं यथा भूतलस्योपकृतिरुपकारस्तस्यां रतः आसक्तः इतीष्टोऽर्थः तस्य बाधकं भूतानां प्राणिनां लोपक
रणे रतस्त्वमित्येवंविधमर्थांतरमाश्रयति भूतलोपकृतिशब्दः ११॥

वा॰
भटी॰
९
17

अथ लक्षणं लक्षयति यत्पदानां शब्दानां शब्दशास्त्रेण व्याकरणेन विरुद्धं तदलक्षणं कथ्यते उदाहरति यथेन्दुरुदाहरणार्थं मानवतीनां तरुणीनां मानस्याहंकारस्य दलयतीति दलनो विदारकः इंदुश्चंद्रो विजयति विशेषेण जयति चंद्रोदये मन्मथोन्मादेन पतिभ्यस्ताहंकारान् अपि द्रुवन्तेयामानं भंजंतीति अत्र विपराभ्यां जेरिति सूत्रेण त्मनेपदप्राप्तिर्विजयतीति परस्मैपदं दुष्टं विजीयात् इत्येवमस्तु स्वसंकेतप्रक्लृप्तार्थमाह १९ नीयतेऽन्यतो ने यं ग्राह्यं न तु गम्यं नेयं च तदर्थांतरं च नेयार्थांतरं तस्य वाचकं पदं स्वसंकेतप्रक्लृप्तार्थं भवतीत्यर्थः उदाहरति

शब्दशास्त्रविरुद्धं यत्तदलक्षणमुच्यते मानिनीमानदलनो यथेन्दुर्विजयत्यसौ ९ स्वसंके त॰

प्रक्लृप्तार्थं नेयार्थांतरवाचकं यथा विभाति शैलोऽयं शुभ्रितैर्वानरध्वजैः १०॥

अत्र वानरध्वजैरिति ककुभाख्यैः अर्जुनवृक्षैरित्यर्थः वानरध्वजशब्देन अर्जुननामा पांडवः कथ्यते तस्य कपिध्वजत्वात् न तु अर्जुननाम्ना साहचर्येण ककुभवृक्षस्तेन वानरध्वजपदं यत्तु समस्तकविसंकेतो न तत्र दोषो यथा रथांगः चक्राह्वनाम्नि पत्रिणि द्विरेफशब्दो भ्रमरे द्विकशब्दः काके ११॥

१॰ नेयपदं नेयार्थं वानरध्वजशब्देन हि ककुभवृक्षो न कथ्यते ततः स्वसंकेतेनैव प्रक्लृप्तार्थो वानरध्व॰ २

अथाप्रसिद्धमाह यस्यपदस्यप्रसिद्धिःकविभिर्नास्तितदप्रसिद्धंविद्धि यथा त्वेनजानंतियातुनामनेकार्थत्वा
त् कथयंतिवा उदाहरणंयथा हेभूपेंद्र तवकीर्तिश्वेतःसंख्यान् सर्वपाश्चिमदक्षिणोत्तरान्समुद्रान्हंतिगच्छ

यस्यनास्तिप्रसिद्धिःकाव्यप्रसिद्धंविद्धियथा राजेंद्र
भवतःकीर्तिश्चतुरोहंतिवारिधीन् १४ ॥

तिभ्राम्यतीतिभावः अत्रहनहिंसागत्योरितिधातुपाठेगत्यर्थः पठितोपिहंतिधातोर्नैकविषयेपरायांप्रसि-
द्धः प्रयोजनविशेषेतुगत्यर्थप्रयोगोस्त्येवयथाविशेषश्लेषादिषु १४ ॥

वा
भ·टी·
१८
18

असंमतमाह यत्पदमर्थमाख्यातुं अभिधेयं वक्तुं शक्तमपि समर्थमपि महाकविभिश्चेन्न सम्मतं कवीनां
नाभिमतं तदसंमतं कथ्यते यत्तदोर्नित्यसंबंधात् तच्छब्दस्य स्वयंगम्यमानत्वात् अथोदाहरणमाह रवेः सूर्य-
स्यांशवः किरणास्तमएवांभोजः कर्दमः तं तमोंभोजं भ्रांतरूपमंभोजं कर्दमं क्षालयंतीत्यर्थः अत्रांभोजशब्दो
अंभसो जातोंभोज इति व्युत्पत्त्या कर्दमं वाचयितुं समर्थोपि कमलादन्यत्र कवीनां न संमतः कमल एव तस्य रूढ-
त्वात् तथा प्रपूर्वः स्मृधातुर्विस्मरणार्थे एवमप्रसिद्धो न तु प्रसिद्धो दृष्टस्मरणार्थे तथा चोक्तं नैषधकाव्ये ॥

शक्तमप्यर्थमाख्यातुं यन्न सर्वैरसंमतं असंमतं तमोंभोजं क्षालयंत्यंशवो रवेः १५ ॥

नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोपि इत्थमर्थिचयसंशयदोलावेल्लनं खलु च-
कार नकारः १ तथा प्रपूर्वः स्थाधातुर्गमनार्थे प्रसिद्धो न तु प्रकृष्टस्थानार्थे यथा सो नगरं प्रति प्रस्थितः गत
इत्यर्थः तथा आङ्पूर्वो वहतिः करणे न तु समंताद्वहने यथा सखि या विस्मयावहा विस्मयकरीत्य-
र्थः एवं कविसंमतमेव पदं प्रयोज्यं काव्ये नान्यत् १५ ॥

अथग्राम्यमाह यत्पदं यत्र देशेऽनुचितं वक्तुमयोग्यं भवति इति निश्चितं तत्पदं तत्र देशे ग्राम्यं स्मृतं कविभिः
स्तदं श्लेषकथितमित्यर्थः यथोदाहरणार्थमहं छुषै: स्तनान् अभ्यर्च्य बलिं ढौकयामीत्येवं वक्तुं योग्यं भ
वति अत्र तु अहं देवान् छुषै: छादयित्वा ग्रेथान्नं ढिपामीति ग्रामीणलोकस्तल्पवचनं प्रोक्तं ततः स्त्राटपाय

यद्यत्रानुचितं तद्धि तत्र ग्राम्यं स्मृतं यथा छाद
यित्वा स्वराञ्छुषै: पुरो यान्नं ढिपाम्यहम् १४

दं ग्राम्यं ज्ञेयमिति तथा व्रीडाजुगुप्सामंगलप्रतीतिकारि येषा श्लेषेपि सभाऽनुचितत्वात् ग्राम्यपदं व्रीडादे:
स्तद्यथा साधनं सुरतं यस्य दृप्यत्त्र साधनं प्राहुः पुंश्चिह्नेपि यो करोते जुगुप्सावाचको यथा वायुः प्रसरति वा
युर्वा ह्लोपानपवनपांका कारी अमंगलप्रतीतिकारी यथा संस्थितोयं संस्थितप्राह्लो ॥

वा॰
अदी॰
१५
17

अस्तार्थपोकांक॰ मेति तथा अतिपेलवमतिपरिमित
वर्षी लघुतरमुदाहरति [illegible]: परमार्थतः सहृदयं वदति पुनः कालकूटवादि
[illegible]मिति अत्र पलपाद्दो सम्भवात् याम्यपवयाभ्यां संतिरित्यादयस्तु क्वचिद्देशे ऽसम्भवा
त् [illegible]: ननु सर्वत्र भगवती भगिनी पावलिप्रभृतयस्तु लोके विरुद्धत्वात् अदुष्टाः उक्तं च लोक
व[illegible]तिपत्तव्यो लौकिकोऽर्थः परीक्षकैः प्रतिलोकव्यवहारं सदृशो वाला पंडितोऽइति क्वचिदेषामप्यनर्थ
कादीनामपरुषता चवयस्मिन् दासीतनवाहं समर्वदा ततमानय मद्योक्तिमेनामध्येत्ययं प्रकः
१ वकारादयोऽनर्थका अश्लीलत्वाद्[illegible] तथाप्यज्ञानुकरणार्थत्वात्तेषां न दोषः पुनःपततस्तु तिनिर
योर्वीच्यो[illegible]ताथमपि नद्धं यथा रतस्त्वमेव भूपालभूतलोपकृतौ यथा अतपवयपाः
स्वैरं न वा सर्वा प्रकीर्तयः स्वैरं स्वेच्छाचारि मंदं वा सर्वा दुताः अकार एवं[illegible] प्रकीर्तय इत्यर्थः
प्रहेलिकायां स्वसंकेतप्रकृत्यार्थमपि नद्धं यथा अवलो[illegible]सामलवयणं[illegible]मदाव
[illegible]जाउ रवि[illegible]यम मंडलीक[illegible] ज्ञिपसूणां[illegible]गच्छि अत्र रविततयः करणस्त[illegible] वाच्यः १८॥

संप्रत्यष्टौ वाक्यदोषानुक्रमेणाह उक्ताः पददोषाः यस्मिन्वाक्ये सदोषं पदं प्रयुज्यते तद्वाक्यमपि दोषपदयोगा
त्सदोषमेवेत्याह तद्दोषाः पदगतदोषाः अनर्थकादिकाः निश्चितं तत्र वाक्ये संति वाक्यस्य पदात्मकत्वात् प
दरूपत्वात्सदोषपदे निष्पन्नं वाक्यमपि सदोषं निर्दोषपदैर्वाक्यमपि निर्दोषं यथा राजेंद्र भवतः कीर्तिश्चरो
दंतिवारिधीन् अपरदंतीति सदोषक्रियया समयदोषं वाक्यं सदोषं जातं एतावंतो ये पददोषा भवंति येप

पदात्मकत्वाद्वाक्यस्य तद्दोषाः संति तत्र हि अपदस्यास्तु ये वाक्यदोषास्तानाह समदेष्युना १७ खं
डितं व्यस्तसंबंधमसंमितमपक्रमं छंदोरीतियतिभ्रष्टं ष्टं वाक्यमसत्क्रियं १८ वाक्यांत
रप्रवेशेन विछिन्नं खंडितं मतं यथा पातु सदा स्वामी यमिंद्रः स्तौति वाजिनः १९॥

दस्या वाक्यदोषाः ये पदे न संति किंतु वाक्ये संति तानधुना व्याख्यः १७ एवं वाक्यं दुष्टं सदोषं छंदोभ्रष्टं रीति
भ्रष्टं यतिभ्रष्टं १८ अथानुक्रमेण सर्वानाह यद्वाक्यं वचनांतरन्यासेन विछिन्नं त्रुटितं तत् खंडितं जिनः
स्वामी वो युष्मान्पातु इति वाक्यं यमिंद्रः स्तौतीति वाक्यांतरेण विछिन्नत्वात्खंडितं १९॥

वा॰
भ॰टी॰
४॰
२०

एकस्मिन्नेव वाक्ये संबंधपदाद्दूरत्वे सति यस्य पदस्य यत्पदं संबंधितं तत्रैव योज्यं तद्दूरत्वे व्यस्तसंबंधमुच्य
ते यथा शार्दूलानामाघस्तत्वातिस्तोता वः संपदं देयादिति संबंधिपदानां यद्दूरे स्थापनं तद्व्यस्तसंबंधित्वेयम् १॰
यत्र संबंधि पादार्थौ ललाविद्युताविव न संमितौ यथा ललाविद्युतौ द्वयोर्द्वयोः पार्श्वयोर्न संमितौ यत्र पादार्धाव
द्वयोर्थौ स्तो वाक्यविदस्तद्वाक्यमसंमितमाहुः उदाहरणमाह २॰ मानसे ओको गृहं यस्य पततः पक्षिणः

संबंधपददूरत्वे व्यस्तसंबंधमुच्यते यथा वः संपदं त्वात्पदेयात्तत्वातिवो दूतताम् १॰ पादार्धौ य
त्र न ललाविद्युताविव संमितौ तदसंमितमित्याहुर्वाक्यविदो यथा २॰ मानसौकः प॰
तयानदेवासनविलोचनः तमोरिपुविपत्तारिप्रियां दिक्पालवोजिनः २२॥

समानसौकः पततां हंसः स एव यानं यस्य स चासौ देवश्च समानसौकः पततयानदेवो ब्रह्मा तस्यासनं कम
लं तद्वत्स्पष्टो विशिष्टे लोचने यस्य स जिनो वो युष्माकं तमोरिपुविपत्तारिप्रियां दिक्पालवु तमोरिपुः सू
र्यस्तस्य विपत्तो राहुस्तस्यारिर्विष्णुस्तस्य प्रिया लक्ष्मीस्तां दद्यात् अत्र पदद्वयबाहुल्ये नार्थस्तोकमेवेति दोषः अथ पुर
करमदक्षमेवं न दोषः पाञ्चाल्यां तु अर्थबाहुल्यतो गुणाय भवति २२॥

१॰

यत्रवाक्ये प्रसिद्धक्रमलंघनं तदपक्रममुच्यते अपगतः क्रमो यस्मात्तदपक्रमः तथादौ स्नानं ततो देवपूजनम्
ततो गुरुनमस्करणं ततस्तु भोजनमित्यादिक्रमोत्र भग्नः २२ यद्वाक्यं छंदःशास्त्रविरुद्धं तच्छंदोभ्रष्टं इति क
थ्यते यथा येनतु दाहरणे स जिनपतिर्जयतु विजयतां परब्रह्मणो महानिधानमित्यत्र सजयतुच्छंदोभंग आया
दत्र गान्नगणस्य पतनत्वात् अनुष्टुप्लक्षणं नास्ति तथा चोक्तं वक्त्रं नाद्यान्नसौ स्यातामित्यादि आदिकारस्तु

अपक्रमं भवेद्यत्र प्रसिद्धक्रमलंघनं यथा भुक्त्वाकृतस्नानो गुरून्देवांश्च वंदते २३ छंदःशास्त्रवि
रुद्धं यच्छंदोभ्रष्टं हि तद्यथा सजयति जिनपतिः परब्रह्म महानिधिः २४ रीतिभ्रष्टमनिर्वाहो यत्र रीते
र्भवेद्यथा जिनो जयति सश्रीमानिंद्रप्रमुखवंदितः २५ एवं वा रीतिसमासः ॥ पदांतरविरतिप्रोक्तं
यतिभ्रष्टमिदं यथा नमस्तस्मै जगत्स्वामिने सदा नेमयेर्हते २६ ॥

तत्र वृत्तरत्नाकरछंदसि विलोकनीय इति २४ २५ यद्वाक्यं पदांतरविरतिर्यतिस्तथा प्रोक्तं तत् यतिभ्रष्टं कथ्य
ते पदांते सर्वत्र विरतिः कार्या न तु पदमध्ये यत् पदमध्ये विरतिः प्रोक्ता तदपभ्रष्टमुच्यते यतिव्यतीते प्रकारे
नमस्तस्मै जगत्स्वामीत्यत्र वर्णपूर्वत्वात् पदांतयतिः कृता निश्चत्यत्तरं च तत्रर्थपदे यतिर्नैवं भवेत् भवेच्च कापि समध्यावि

वृत्तरत्ना टी. २४ ॥

वा॰
भ॰टी॰
२१

अप्रसक्तीति क्रियायत्र वाक्ये तत् क्रियापदविहीनमसत्क्रियामुच्यते यथाहं सरस्वतीं पुष्पैरर्चयामि श्रीखंडैर्कुसु·
यत्र प्रतीयते साम्यं प्रतिवस्तूपमा तु सा ९१॥

द्धितां उर्वीं पृथ्वीं धवलीकुर्वन् तथा निशाया विलासकमलं पद्ममिवेति निशाया विलासकमलस्योदितो रव-
इं रूपकमेतत् समासो रूपकालंकारः अथ प्रतिवस्तूपमालंकारमाह ९० इवादीनां प्रयुक्तानां प्रव-
पात्तौ अकथने यत्र वस्तुनः प्रतिवस्तुना साम्यं सममता प्रतीयते सा प्रतिवस्तूपमा ज्ञेया ९१॥

वा·
अ·दी·
४४
44

बहुव्रीहेणसावेकोयदुवंशोद्भूतोभवत् ७२ यथाबहुव्रीहेऽत्यत्रस्वयमेवावगम्यं उक्तः प्रतिवस्तूपमालंकारः
अथभ्रांतिमन्तमलंकारमाह यत्रतत्तुल्यस्यअन्यवस्तुनः अन्यत्रकुत्रापिवस्तुनोनिश्चयोजायेतनिश्चयः से
भवतिसभ्रांतिमान्अलंकारःकथितोलंकारवेदिभिः उदाहरणमाह ७२ हेप्रस्ताविभ्रमपरंपराश्रेणिः
तववदनेइदंहेमकमलमितिभ्रांत्यानिपतति तवनयनेइदंनीलोत्पलमितिभ्रांत्यानिपतंति तवहसि

वस्तुन्यन्यत्रकुत्रापितत्तुल्यस्यान्यवस्तुनः निश्चयोयत्रजायेतभ्रांतिमान्सःस्मृतोयथा ७२ हे
मकमलंतिवदनेनयनेनीलुत्पलंतिपसेयद्भिकुमुदंतितव अहसिपतिवउइभ्रमपरालिके
ली ७४ उक्तिर्यत्रप्रतीतिर्वाप्रतिषेधायजायते आचक्षतेतमाक्षेपमलंकारंबुधायथा ७५ ॥

तेइदंकुसुममितिभ्रांत्यानिपतति अत्रभ्रांतिमत्यलंकारे अंत्यक्रियादीपकंज्ञेयं उक्तोभ्रांतिमान
लंकारः अथाक्षेपालंकारस्यअवसरः ततस्तस्यलक्षणमाह ७४ यत्रउक्तिः अथवाप्रतीतिःप्रतिषे
धायजायते बुधास्तमाक्षेपालंकारमाचक्षते ७५ ॥

यथेमुदाहरणं यदिसः कर्णनरेन्द्रसूनुः जयसिंहदेवो राजाभूत् तदाइंद्रेणाकिं यदितस्याहिपेंद्रः गजेंद्रोद्धप
तेतदापैरावतेनाकिं यदितस्य प्रतापाअनलमत्यर्थंतपतितदादंभोलिना वज्रेणालंसर्यतेत यादिसानतुशीले
भेतदास्वर्गोप्ययंमुदा यन्नतुउदाहरणं उक्तिः साक्षाद्दर्थप्रकाशानं अत्रयदिकर्णनरेंद्रसूनुस्तदाइंद्रेणाकिमि
त्यादि साक्षाद्दर्थप्रकाशानंसर्वमप्यतिप्रतीतानां अन्योदाहरणं द्विधाविधिपूर्वको निषेधपूर्वो विधिश्च प्राक्

इंद्रेणकिंसयदिकर्णनरेंद्रसूनुरैरावतेनकिमहोयदितद्विपेंद्रः दंभोलिनाप्यलमलंयदितत्प्र
तापः स्वर्गोप्ययंनतुमुधायदितत्पुरीसा १८ यस्यास्तिनरकक्रोडनिवासेरसिकंमनः
सोस्तुहिंसानृतस्तेयतत्परः सुतरांजनः ११॥

विधिपूर्वकनिषेधेउदाहरणं १८ यस्यजनस्यमनः नरकक्रोडनिवासरसिकंभवति क्रोडउत्संगउच्यते
सजनः सुतरामत्यर्थं हिंसानृतस्तेयतत्परोस्तुभवतां अत्रतावत्प्रतीतिः अयोनरकेगंतासहिंसादिकरो
त्विति विधिमालोक्यप्रतावता हिंसादिकेनापि नकर्तव्यः इतिप्रतीयमानोनिषेधति यत्साक्षात्प्रकाश
वनृदयमानोस्यार्थः अथ प्रथमाविधिपूर्वकनिषेधात्मिका प्रतीतिरवगंतव्या ११॥

धनदेयतः धनस्य परकीयत्वात् यथा कदापि धनं ददते एवं कीर्तिं करुणामहीनो न रोम रणकाले पि धनं न ददातीति भाव:

वा॰ अथ निषेधपूर्वकं विधेः प्रतीतिरुच्यते ये कीर्तिं नछंति ये च करुणामपि करुणा[illegible]ते किं मरणस
अ॰टी॰ मयेपि धनदयत्वं च न धनं ददति अपि तु न ददतीत्यर्थः एतावता कीर्तिमभि[illegible]हिः करुणा च कविहिः ध
४५ नमद च सदैदेयमित्यर्थः अत्र निषेधपूर्वको विधिरवगंतव्य देयमिति प्रतीय[illegible]तोगापि प्रतीति
45

इच्छंति ये ण कित्तिं करुणं ति करुणाखवणं पि जे ने य ते धन जक्खावन
णादिं ति य ण मरणसमए वे ७८ इदमेतदिदं वेति साम्याद्बुद्धिर्हि सं
शयः देवभिनिश्चयः सोपि निश्चयांतः स्मृतो यथा ७९॥

वर्तते यथा वह्निः स्वमत्याकल्पता नास्ति हृतो न किमपि न विद्यते तथा संशयालंकारमाह ७८ साम्या
त्समानभावात् एतत् इदं वा इत्ययं बुद्धिः हि निश्चितं संशयालंकार उच्यते यत्र तु संशयमुक्का यमिनि
श्चयो जातः सोपि निश्चयांतः संशयालंकारमाह संशयनिश्चयालंकार इत्यर्थः उदाहरणमाह ७९॥

द्वेजयसिंहदेवराजन्भवत्पाणिगतंकृपाणंदृष्ट्वाकवीनांमतयः एवंसंशयंविदधातीत्यर्थः किमेषःप्रति
पक्षलक्ष्म्याःकेशपाशोनत्वेषखड्गा अथवाकिमेषप्रतापानलधूमः केशपाशोपिकृष्णधूमोपिकृष्णःखड्गोपि
कृष्णः अतःसंशयालंकारः संशयनिश्चयालंकारोदाहरणमाह ८० सपक्षयदिइंद्रइतिसंशयः तर्हिकिं

किंकेशपाशःप्रतिपक्षलक्ष्म्याःकिंवाप्रतापानलधूमएषः दृष्ट्वाभवत्पाणिगतंकृपाणमेवं
कवीनांमतयःस्फुरंति ८० इंद्रःसपक्षयदिकिंनसहस्रमक्ष्णांलक्ष्मीपतिर्यदिकथंनचतुर्भु
जोसौ अस्यंदनध्वजधृतोहरताम्रचूडः श्रीकर्णदेवनृपसूनुरयंरणाग्रे ८१॥

अक्ष्णांनेत्राणांसहस्रंनास्तितदानभवतीइंद्रःइतिनिश्चयः यदिलक्ष्मीपतिस्तदाकथंनासौचतुर्भुजः अ
तोनत अयंरणाग्रेकर्णदेवनृपसूनुर्जयसिंहः कीदृशः स्यंदनस्यरथस्यध्वजेधृतउहरउत्कटस्ताम्रचूडः
कुक्कुटोयेनसतथासमासासंशयालंकारः संशयनिश्चयालंकारश्चसमासः ८१॥

वा॰ भ॰टी॰ ४९ 46

अथ दृष्टांतालंकारमाह यत्र क्रियया स्वतदर्थयोः स्वार्थतदर्थयोरन्वयस्थापनं क्रियते अन्वयः परस्प
रं योग्यता तस्य स्थापनं विधीयते तं दृष्टांतः अलंकारमिति मनीषिणो बुधाः प्राहुः ८५ उदा
हरणमाह। ता गुणानि गुणाश्च जरतीनां हृद्गतानां ऊचयुग्मं इति कथयन् परिहरति निर्मला॰

अन्वयस्थापनं यत्र क्रियया स्वतदर्थयोः तं दृष्टांतमिति
प्राहुरलंकारं मनीषिणः ८५ पतितानां संसर्गं त्यजंति हृदयेन निर्म
लागुणिनः इति कथयन् जरतीनां हारः परिहरति ऊचयुगल
मू ८६॥

गुणिनः पतितानां संसर्गं हृदयेन त्यजंति तथा ये ये गुणिनो निर्मलाश्च ते पतितसंसर्गं त्यजंति यथा
हारः इत्येषोऽन्वयव्यापनाद्दृष्टांतः अन्वयस्थापनं साटपपमिति च परस्परयोः स्वार्थतदर्थयोरित्यर्थः व्यति ४९

यत्र द्वयोः संसिद्धसाम्ययोः संसिद्धं साम्यं ययोस्तौ तयोः संसिद्धसाम्ययोः केनविद्धर्मेणा केनविद्गुणेन एकत
राधिक्यं एकतरस्याधिकता भवति सव्यतिरेकालंकारः उदाहरणमाह ८४ जयसिंहदेवपृथ्वीपतेः स्व

केनचित्तद्धर्मेणा द्वयोः संसिद्धसाम्ययोः भवत्येकतराधिक्यं व्यतिरेकः स उच्यते ८४ ॥
अस्त्वस्त्र पौरुषगुणा जयसिंहदेवपृथ्वीपतेः मृगपतेश्च समानभावाः किंत्वेकतः
प्रतिभटाः समरं विहाय सद्यो विशंति वनमन्यमपांकमानाः ८५ नैतदेतदिदं मेतदित्यप
ह्नवपूर्वकं उच्यते यत्र साद्भ्रयादपह्नुतिरियं यथा ८६॥

गपतेश्चपौरुषगुणाः समानभा वोस्तु किंत्वेकतो
जयसिंहदेवात् समरं त्यक्त्वा प्रतिभटाः वैरिणः सद्यो वनं विशंति अन्यसिंह आशंकमानाः एताव
ता सिंहभयादपि राज्ञो भीरधिकाऽनराधिक्यं ८५ यह्नुतिमाह अपगंतव्या उदाहरणमाह ८६॥

वा· अत्रांधकारस्यापहृत्वं वियाचरेण स्थापनापृथा अथ तुल्ययोगितालंकारमाह ८७ यत्र तुल्यैककाल॰
ग्भ·टी· क्रियया करणाभूतया उदाहरणमाह ८८ हे जिन तमसा पापेन यत्त्वेऽंधकारेण लुप्यमानानां साधुवर्त्म
४० नां प्रकाशनाय प्रभुता तवास्ति अथ च भानोरस्ति अत्रोपमेयं जिन उपमानं भानुः उपमेयं उपमानेन समी
47

नैतन्निशम्य यां स्मितस्तूव्यमेव मंथीकृता लोकनमंधकारं निपुणगामे प्रस्थितपंचवाणसेनास॰
मुत्थापितपथरेणुः ८७ उपमेयं समीकर्तुमुपमानेन योज्यते तुल्यैककालक्रियया यत्र
सा तुल्ययोगिता ८८ तमसा लुप्यमानानां लोकेस्मिन्साधुवर्त्मनां प्रकाशनाय प्रभुता
भानोरस्तव च दृश्यते ८९ कल्पना काचिदौचित्याद्यत्रार्थस्य सतोन्यथा द्योतितेवादिभिः
प्राहैरुत्प्रेक्षा सा स्मृता यथा ९० ॥ ॐ

दृश्यते क्रिययोर्द्वयोरपि तुल्यैककालता अत्र कर्मण्युक्तो वर्तमानकालोस्ति उत्प्रेक्षालंकारमाह ९ ४
यत्र सतो यथा यत्र सतो विद्यमानस्यार्थस्य औचित्यात् योग्यत्वात् अन्यकाचित् इवादिभिः प्राहैर्द्योतिते कल्प हि

४०

वंद्रुविप्रलोह्याः वंद्रकिरणांकुराः नभःस्थले किंविदिवप्रसृताः यथाभवति प्रतिछाये जिरेनवोदय-
त्वात् उत्प्रेक्ष्यते प्रमोदात् जगद्भिलित्वाद्दमतोह्यास्यऊर्ध्वतोध्वांतनिषण्णवरस्यांधकारस्य त्रसः दंतांकुरवा
दिभिः पाछेस्वादिग्रहणात् यथासंख्येन वमन्येनूनं प्रायइत्यादिग्राह्याः यथाजानेपांके प्रुवमन्येय शारद

नभःस्थले किंचिदिव प्रविष्टास्तु कास्तिरेवंद्रुविप्रलोह्याः जगद्भिलित्वाद्दसतः प्र
मोदाद्दंतांकुरवध्वांतनिषण्णवरस्य ६१ उक्तसिद्ध्यर्थमन्यार्थन्यासो व्याप्तोऽपरःस
रः कथ्यतेर्थांतरन्यासः श्लिष्टोश्लिष्टश्चसद्विधा ६२॥

त्ववत्तेववानलद्रवापीति नुक्षान्ताउत्प्रेक्षा रूपकं विडः अथार्थांतरन्यासालंकारमाह ६१ यत्रउक्त
सिद्ध्यर्थं परःसरेणान्यार्थन्यासो विधीयते सोर्थांतरन्यासः कथ्यते सद्विधाश्लिष्टोश्लिष्टश्चश्लिष्टः
श्लेषसहितःअश्लिष्टःश्लेषरहितः ६२॥

वा:
भ.टी.
५८
48

बभूवुर्मद्यपानात् असिताब्जभासां नीलोत्पलभासां अदृशां नेत्राणां प्रेमाणं रक्तता बभूव तद्गुण गिरि
अर्थाभिः एव प्रकारो बभूव विपरीतो जातः अस्यार्थः अत्र मध्यपानपात्राणां नेत्राणां मूकं वस्य उक्तस्य सिद्ध
र्थं स्यात् न अर्थं पुनः अर्थान्तरन्यासः स्मरानुभावो हि निश्चितं अचिंत्यनीयः ... तथा केना
पि दृष्टं मद्यपानान्नेत्रयो रक्तत्वं किं न ज्ञायते तत्तव वा चिंत्यनीयो हि स्मरानुभावः इत्यर्थान्तरन्यासेन रक्तत्वमि

प्रेमाणमदृशामसिताब्जभासां गिरां प्रचारः स्वपरप्रकारः बभूव पानान्मधुनो मदस्य चिं
त्यनीयो हि स्मरानुभावः ५३ पुंजादरंडैः कंपिताऊंजराणां पुष्पोत्सर्गं पादपाश्चाकचेऊः स्त्र
ब्याकाराः किं प्रयच्छंति किं विक्रीमायावन्नोद्धृतैर्वीतपंकं ५४ ॥

ष्टिः पद्यश्लिष्टार्थान्तरन्यासालंकारश्चाश्लिष्टमाह ५४ पादपाः वृक्षाः ऊंजराणां कुंजरदंडैः कंपिताः सं
तः चारु पुष्पोत्सर्गं चक्रुः स्त्रब्याकाराः उद्धृतैः वीतपंकं यथा भवति यावन्नाक्रांताः तावत् किंचिन्नय
च्छंति अत्र प्राक्तनपदद्वयउक्तस्यार्थेन तत्पदद्वयेनान्यार्थन्यासरूपेण सिद्धिः कथिता ५४ ॥

वक्तुमिष्टस्य भणितमारब्धस्यार्थस्य प्रतीतजननेक्षमं प्रतीतेकत्वादसमर्थं सयमं सदृशं अन्यहस्तं यद्योच्यते
द्वयं समासोक्तिर्भवति उदाहरणमाह ९५ हेमधुकर यो गकं माऊरु करीरद्रुमस्य ऊसमे शु विचर इति वक्तुमि
ष्टोर्थः अस्य प्रतीतिजननेक्षमं सदृशमन्यहस्तं दंतुरिति वितर्कं कण्ठं सा मालती मिलति एतावता मा

उच्यते वक्तुमिष्टस्य प्रतीतिजननक्षमं सधर्मं यत्र वस्त्वन्यत्समासोक्तिरियं यथा ९५ मधु
करमाऊरु यो कं विचर करीरद्रुमस्य ऊसमे ष्ठु वनतद्दिनपातदलिताकयं तु सामाल
ती मिलति ९६ विनाकारणसद्भावं यत्र कार्यस्य दर्शनम्‌ नैसर्गिकगुणोत्कर्षभावना
त्साविभावना ९७ ॥

लतीनास्तिकरीरऊसमेभ्भावेनहेभ्रमर विचर अत्र
द्वयोरपि तुल्यत्वात्‌ सादृश्यं विभेदित्वात्‌ अन्यत्‌ कीदृशी मालती वनत्वहिनपातैर्दलिता॰
ज्वलिता यदि सा मालती वनतुहिनपातदलिता मनातातरा किं मिलति ९८ यत्र कारणसद्भावं वि
नानैसर्गिकगुणोत्कर्षभावनात्कार्यस्य दर्शनं दृश्यते सा विभावना मता उदाहरणं ९७ ॥

वा॰
अ॰टी॰
४९
49

अत्र विद्वत्ताकार्यकारणं तत्र अध्ययनं कार्यकारणं विनापि सहजगुणेनैव जातं एवं पदद्वयेपि भावनीयं
उक्तो विभावनालंकारः ४८ अत्र आदिमध्यांतवर्तिपकपदार्थेन क्रियारूपेण वाक्यस्यार्थसंगतिर्जायेत
तत्तदीपकमुक्तं ४९ हे स्वामिन् दिव्याकाशे गंधर्वास्तव पावनं यशो जगुः किन्नराः उत्तालाचलकंदरेषु

अनध्ययनविद्वांसो निर्द्रव्यपरमेश्वराः अनलंकारसुभगाः पांतु युष्मान् जिनेश्वराः ४८ आदि
मध्यांतवर्त्येकपदार्थेनार्थसंगतिः वाक्यस्य यत्र जायेत तत उक्तं दीपकं यथा ४९ जगुस्तव दिवि
स्वामिन् गंधर्वाः पावनं यशः किन्नराश्च उत्ताद्रीणां कंदरेषु सुहृद्वर्यदा १० विराजंते तस्मिन्स्वामि
ध्यानेनेदि वितारकाः विभांति कुमुदश्रेण्यः शोभंते निशि दीपकाः १ वस्तुनो वक्तुमुत्कर्षमसंभा
व्यं यदुच्यते वदंत्यतिशयाख्यं तमलंकारं बुधा यथा १
जगुः स्वर्ग दुर्वेगम् दुर्वारं अत्राद्येकपदार्थेन जगुः
...गतिर्यासा १० एवं मध्यांतयोरपि सर्वत्र यथा विराजंतीत्यादि अत्र एक क्रियाव्यति
रेकं एव पदार्थं मे... निर्मितं यत तत्कारकदीपकं १ यहत्तन उत्कर्षवक्तं असंभाव्यं उच्यते सोतिशयालंकारः २॥ ४९

देहलीतीपात्वद्दारितारितरुणीश्वसितानिलेन श्वाससवातेन महोदधिषु संमूर्छितोर्मिषु उत्पन्नकल्लोलेषु सत्स्वं
तर्मध्ये लुठंतो वलंतो गिरयस्तेषां परस्परश्रृंगसंगसंगतस्तस्य घोषारवैर्निद्रामपयाति अत्र तरुणीणां श्वासा
निलस्यातिशयवर्णाद् इति संबंधायालंकारः यदियोगेऽतिशयालंकारमाह ४ यदिपर्वतेपर्वताधिरसि

त्वद्दारितारितरुणीश्वसितानिलेन संमूर्छितोर्मिषु महोदधिषु दितितोषु अंतर्लुठद्गिरिप
रस्परश्रृंगसंगघोषारवैर्बधिरितोऽपयाति निद्रा ३ एकं द्वौ निसमस्तुयंदि क्वचाणि पर्वते
तदोपमीयते पार्श्वमूर्धि समफणः फणी ४ यद्योऽस्याद् यतः किंचिदर्थकर्तृः प्रकाश्यते
तयोग्यतायुक्तिरसोऽदेवकृत्को बुधैर्यथा ५॥

९. एकं द्वौ त्रीणि समस्तान्यपि भवंति तदा समफणो फणी पार्श्वमूर्धि उपमीयते अत्र फणिनोऽतिशय
अ.कु. स्वाकायकोद्वौ येषु कुत्रेषु तान्येकद्वौनि ४ कर्तृः पुरुषस्य किंचिदर्थमुत्पादयः यत्र तयोग्यतायुक्तिः
श्री. तस्यार्थस्य या योग्यतायुक्तिः प्रकाश्यते स देव रलंकारः ५॥

वा॰ भ॰टी॰ ५॰ 50

बालकयोर्वनसमयोन्मत्तासतीनाथस्य भर्त्तुर्विरहेणसमीकं मध्यंतरचोलयन् मधुरस्वरंगीतंकरोति कंदा
भ्यंतरएवचोलनेगीतंलज्जयाबहिर्नप्रकटयतीत्यर्थः अत्रकर्त्तुःकंचिदर्थमुत्पादयतः इतिकर्त्तव्यरूपायावालि
कायागीतमिति अत्यादितोर्थः तस्ययोग्यताउक्तिःनाथस्यविरहः यौवनसमयोन्मत्तावगीतस्यहेतुःकारण
मेतत् इतिगाथार्थः ८ भ्रमरोकोविषसोदरः चेद्विषयोरेकत्रउत्पत्तित्वात् हंतेतदिशाआगतः पवनःशिख

नवरणसमउन्मत्ता तन्नाविरहहरणाऊरणइनाद्दस्स कंदब्भितरचोलिरमहुरसरंवालियागीयं ८
विषसोयरोभयंकोकयंतआसाइआगवोपवणिजाईपलासोसिहरीतयहियमादितितेइह्निं ७
अतत्परतयायदजल्पमानेनवस्तुना विवक्षितंप्रतीयेतपर्यायोक्तिरियंयथा ८॥

रीहृत्वोजातिपलाशाः एतेत्रयोविपथिकाननेइदानींमारयंति यत्रभ्रमरणस्यहेतुरमी एकोविषसोदरः
अन्योयमालयनिवासीपवनः अपरस्तुपलाशाः एतेपलाशोहुताः ७ पर्यायेणभंग्यंतरेणवचनंउक्तिः पर्यायो
क्तिः यत्रविवक्षितंवस्तुकिमपि अतत्परतयानविवक्षितं परतयाजल्पमानेनवस्तुनार्थप्रतीयेतइयंपर्यायोक्तिः ८॥

देशभो मकुरंगेऽस्तवत्सेन्यवादनिवद्धस्यरिपुपुरंध्रिजनस्यवद्धेष: आसीत् एकोवाहसमूहः खुरैर्वहु
लरेणुततिं चकार अन्योयोधजनोयत् पुनर्स्तुनलेस्तांरेणुततिं संजहार अत्रविवद्धितोहयोऽस्य
जलस्मानेनार्थनरेणुनाजलेनचमतीतिः नविवद्धितोपरनयायातामवनारिपचोमारितोऽत्येत

वत्सेनस्यवादनिवद्धस्यमहादवेषुहेष: प्रभोरिपुपुरंध्रिजनस्यवासीत् एकः खुरैर्वहुल
रेणुततिंचकारतांसंजहारपुनरस्तुजलैर्यदन्यः ९ कारणांतरसंपत्तिंदैवादारंभएव।
हि यत्र कार्यस्यजायेततत्जायेतसमाहितं ९ मनस्विनीवल्लभवेषमगात्सुकंकिता।
यावदभून्निपाण्यां तावन्नवांभोधरधीरनादप्रबोधितः सोऽथशिखीजुकूज ११॥

तु येनप्रतीयेतसाप्रतत्वरजा ९ यत्रकार्यस्यारंभेएवंदैवात्कारणांतरसंपत्तिर्जायेततत्समाहितंजायेत
मनस्विनीनिपाण्यावल्लभवेषमगात्सुकंकिताभूत्तावन्नवांभोधरधीरनादप्रबोधितः सोऽथशिखीजु
कूजमयूरः जुकूज केकाचकारकांतस्थरगमनेकार्यारंभः पुरस्तात्रकः शिखिमयूरः कारणांतरसंपत्तिः ११॥

वा॰
गम॰ टी॰
५१
51

पदार्थस्यसदृशेनअसदृशेनवाअर्थेनपरिवर्त्तनंपरिवर्त्तोजायतेअसौपरिवृत्तिर्मतायथोदाहरणं ११ हे
भर्त्तः त्वदरातिवर्गः नववैरिसमूहः स्फुरत्प्रदीपानि दृढासिभुजकाग्रदाहपोतेकीदृशासुग्रहासुअंतर्गतव्या
लप॰ मणिमणीनां मध्यस्य सपफणामणीनांप्रभासिरूढासितभूभ्रअसदृशपार्थेनार्थस्यपरावर्तमाह

परिवर्तनमर्थेनसदृशासदृशेनवा जायतेर्थस्ययत्रासौपरिवृत्तिर्मतायथा ११ अंतर्गतव्यालफ
णामणीनांप्रभासिरूढासितभूभ्रभर्तः स्फुरत्प्रदीपाणिगृहाणिभुजकाग्रदाहपोतेत्वदरातिव
र्गः ११ दत्त्वाप्रहारंरिपुपार्थिवानांजग्राह्यः संपतिजीवितव्यं शृंगारभंगीचतदंगनानाम्
मादायपूर्वानिदहोसदेव १४ यत्रोक्तानांपदार्थानामर्थ्यः संबंधिनः पुनः क्रमेणते
नवध्यंते यथासंख्यमुच्यते १५॥

१२ यः संपत्तिसंग्रामेरिपुपार्थिनांप्रहारंदत्वा
जीवितव्यंजग्राह तदंगनानांशृंगारभंगीमादायसदेवः त्वामिंदहो प्रदत्तप्रहारः गृहीतंवजी
व्यतव्यंगृहीतांशृंगारभंगीयंचतासांउः खदयसदृशेनार्थिनामर्थेनपरावर्तोजातः १४ यत्रउ
क्तानांपदार्थानांसंबंधिनोर्थः पुनस्तेनक्रमेणवध्यंते योज्यंते तत् यथासंख्यं उच्यते १५॥

अदमेवमन्येमृदुभुजलतिकाभ्यांयोरणिमानंदयत्यारक्तंविभ्रत्याचरणकमलभासांवाहरणात्राननेन
यथाक्रमंविसकिसलयानिपद्मानिप्रातलक्ष्मीणिकृतानिअत्रतएवतानिवैरात् अंगेतापंविरहविपादित
त्वात् विरहिणीवर्णनमेतत् एवंयथासंख्यालंकारः ९८ यत्रकेनचित् अनोचित्येनअनवसरतयाव

मृदुभुजलतिकाभ्यांयोरणिमानंदयत्याचरणकमलभासावाहरणाद्याननेन विस
किसलयपद्मान्यातलक्ष्मीरिमन्ये विरहविपादिवैरातन्वतेतापमंगे ९९ वस्तुनो
यत्रसंबंधमनोचित्येनकेनचित् असंभाव्यंवदेहुक्तातमाहुर्विषमंयथा १० केदंतः
ववपुर्वत्सेकदलीगर्भकोमलं क्वायंराजीमतिक्लेपादायीव्रतपरिग्रहः १८ ॥

त्वनः पदार्थस्यसंबंधंअसंभाव्यंवक्तावदेत् कवयस्तंविषमालंकारमाहुः यथाउदाहरणार्थः १० रु
देवत्सीराजमतिकदलीगर्भकोमलंक्वइदंतववपुः क्वायंवल्केपादायीव्रतपरिग्रहः अत्रमृदुकोमल ५
स्यतववपुषोदीक्षाअत्रचिता दीक्षासंबंधःतवासंभाव्यंकथंवदसि प्रदीप्यामिदीक्षामितिविषमालंका ८

वा॰
ग्भ॰ टी॰
५२
52

अत्र हेतोः कारणस्य तज्जन्मप्राक्तितां कार्योत्पत्तिप्राक्तितां वक्तुं कार्यकारणयोः सहसमुत्पत्तिकथा समका
लउत्पादनवार्ता भवति सा सहोक्तिर्भवेत् १९ असौ श्रीमान् वीरः कोदंडं यत्र विद्विषां यशसा सह आदत्ते समा
मविद्विषां मदेन सह नमयति विद्विषां श्रिया लक्ष्म्या सह प्रोभयावाकोदंडं कर्षति अत्र यशः आदत्ते यशः

सहोक्तिः साभवेद्यत्र कार्यकारणयोः सह समुत्पत्तिः कथा हेतोः वक्तुं तज्जन्मप्राक्तनं १९ आ
दत्ते सह यशसा नमयति सार्द्धं मदेन संग्रामे सह विद्विषां श्रिया सौ कोदंडं कर्षति श्रीमान्
२० आपाते हि विरुद्धत्वं यत्र वाक्ये न तत्त्वतः प्राहुर्ार्थकृत माभाति स विरोधः स्मृतो यथा २१

ति कार्यं कोदंडग्रहणं तद्यशोग्रहणकारणं कारणस्य कोदंडस्य तज्जनकार्योत्पत्तौ यशोग्रहणा
द्रूपाय प्राक्तनास्ति एवं च सर्वत्र योजना स्वमत्या कर्तव्येति २० यत्र वाक्ये आयति आरंभे प्राब्दा
र्थकृतं विरुद्धत्वं आभाति परं तत्त्वतो नाभाति स विरोधः स्मृतः २१ ॥

उदाहरणमाह कोपिनिस्त्रिंशयनप्रीतः तेन केन विग्रहरूपेण प्रत्यर्थिषु वैरिषु प्रतिरणंस्खलितेषु रणंरणं
प्रतिस्खलितेषु संज्ञामवाप्य पुनरेव युद्धयेषु इह चकार कीदृशेन तेन स्ववर्मणापि दुर्वारवाणनिवहेन वारवाण
कवचमुच्यते वर्मापि कवचपर्यायस्तद्वर्मायस्य स स्ववर्मा दुर्वारवाणस्य कवचस्य निवहो यस्य दुर्वारवाण
निवहः यः स्ववर्मा स दुर्वारवाणः कथं भवति इति विरोधं दर्शयित्वा नन्तत्वतस्त्याह वाणनिवहेन दुर्वार

दुर्वारवाणनिवहेन स्ववर्मणापि लोकोत्तरान्वयभुजापि च पृथ्वीवरेण प्रत्यर्थिषु प्रतिरणंस्ख
लितेषु तेन संज्ञामवाप्य पुनरेव जिस्म ॥ ४४ ॥ येन क्रान्तं सिंहासनमधिभूभृत्छिंनासिवि
नतानि छिन्नमात्रुधिमारपंक्तिः कीर्तियाता दिगंतेषु ॥ ४५ ॥

वाणस्य निवहो यस्य सः तेन तत्र
लोकोत्तरान्वयभुवापि पृथ्वीवरेण यो लोकोत्तरान्वयभूः स कथं पृथ्वीवरः पृथ्वीवरो मतिप्रधानः ... पृथ
मात्रहतो विरोधोलंकारः अथ यथार्थहृतविरोधमाह ॥ येन राज्ञा आक्रांतं सिंहासनं विनतानि अरिभूपा
लशिरांसि अत्र हो विरोधः यं पितमन्यत्र विनतं वान्यत्र तथा छिन्नमात्रुधिमारपंक्तिः दिगंतेषु कीर्तिर्याता ॥

समासोपि द्विधा विशेषालंकारः अत्र प्रस्तुतार्थस्य उत्कर्षं अर्थांतरं यत्नलक्षणं विदुः संभवति बुधैः सोव
सरालंकारः प्रोक्तः २४ २५ यत्र निर्धारितात्सारात् ततः सारं सारं निर्द्धार्यते यथोक्तिः स एव सारः

यत्रार्थांतरमुत्कर्षं संभवत्युपलक्षणं प्रस्तुतार्थस्य स प्रोक्तो बुधैरवसरो यथा २४ स एव
निश्चयानंदः स्वच्छेतरनमविक्रमः येन नंदकचकोरः सोपि युद्धे चंद्रकोजितः २५ यत्र निर्धा-
रितात्सारात्सारं सारं ततस्ततः निर्धार्यते यथाशक्ति तत्सारमिति कथ्यते २६ संसारे
मानुषं सारं मानुष्यके च कौलीन्यं कौलीन्ये धर्मित्वं धर्मित्वे चापि सदयत्वं २७ पदैस्तैरेव
भिन्नैर्वा वाक्यं वक्त्येकमेव हि अनेकमर्थं यत्रासौ श्लेषः स्फुटमुच्यते यथा २८॥

सः सारालंकारः २६ २७ यत्रैकमेव वाक्यं तैरेव पदैर्भिन्नैर्वा पदैः अनेकमर्थं वक्ति असौ श्लेषालंकारः उच्यते २ ८॥

यस्यराज्ञोन्टपस्यउदयेक्षोभमवाप्यकिलेतिश्रूयतेसिंधुनाथः सिंधुदेशाधिपोवेलामंडलक्षेदादिकंजया
द्दतरास्ताग्टहीतवान्‌अस्यार्थः कीदृशस्यअसंतापकरैःकरैःप्रजानांसमंतात्‌ आनंदंउल्लासयतःवर्द्धयतःअ
यमश्लेषःयस्यराजःचंद्रस्योदयेक्षोभमवाप्यसिंधुनाथः समुद्रोवेलांमर्यादांजग्राहप्रीतकरैःकरैःकिरणै
र्लोकानांसमंतात्‌ हर्षमुत्पादयतः तैरेवपदैश्लेषालंकारः २९ चित्रंयोराजचंद्रःनिशांतेप्र

आनंदमुल्लासयतःसमंतात्करैरसंतापकरैःप्रजानां यस्योदयेक्षोभमवाप्यराज्ञोजग्राह
वेलांकिलसिंधुनाथः २९ कुर्वन्‌कुवलयोल्लासंरम्यांभोजश्रियंहरन्‌ रेजेराजापि
यच्चित्रंनिशांतेकांतिमत्तया ३० ॥

भातेकांतिमत्तयाकांतिमत्वेनराज किंकुर्वन्‌कुवलयोल्लासंकुर्वन्‌रम्यांभोजश्रियंरम्यकमलशोभां
हरन्‌ श्लेषमाह योराजान्टपःनिशांतेश्रतःपुरेकांतिमत्तयाराज कुवलयोल्लासंभूवलयोल्लासंकु
र्वन्‌रम्याशोभमानांभोजश्रियंभोजराजलक्ष्मींहरन्‌शत्रूणान्‌ एवभिन्नपदैःश्लेषालंकारः ३० ॥

अथ समुच्चयालंकारमाह यत्र कविते अनेकेषां अत्युत्कृष्टानां अत्युत्तमानां अत्यपकृष्टानामतिम-
ध्यमानां वा वस्तूनां पदार्थानामेकत्र निबंधनं गुंफनं ग्रंथनियोजनमित्येकार्थाः तं समुच्चयं वदंति १३
सर्वोत्तमम् अणहिल्लपाटकं पुरं तस्मिन्नवनिपतिः कर्णदेवनृपसूनुः श्रीजयसिंहदेवः सोपि सर्वोत्त-

एकत्र यत्र वस्तूनामनेकेषां निबंधनं अत्युत्कृष्टापकृष्टानां तं वदंति समुच्चयं १३ अणहिल्लपाट-
कं पुरमवनिपतिः कर्णदेवनृपसूनुः श्रीकलशनामधेयः करी च रत्नानि जगतीह १४
ग्रामेवास्मिन्नायको निर्विवेकः कौटिल्यानामेकपात्रं कलत्रं नित्यं रोगः पारवश्यं च पुंसा-
मेतत्सर्वं जीवतामेव मृत्युः १५ प्रशंसा क्रियते यत्राप्रस्तुतस्यापि वस्तुनः अप्रस्तुतप्र-
शंसां तामाहुः कृतधियो यथा १६ ॥

भूपालेषु तस्य च श्रीकलश नामधेयः करी गजः ३ इह जगति एतानि त्रीणि रत्नानि अत्युत्कृष्टा-
लंकारमाह १५ ग्रामेवास्मिन्नित्यादि सर्गमं भोः वनास्वयमेव विचारणीया एषः अत्यपकृष्टसमु-
च्चयालंकारः १५ अथ अप्रस्तुतस्यापि वस्तुनः प्रशंसा क्रियते कृतधियस्तामप्रस्तुतप्रशंसामाहुः १६ ॥

कोपिदुःखीचिंतार्त्तःसन्यतिःसंतोषसारंदृष्ट्वापप्रच्छवाच यत्रतेनदुःखिनाभिक्षुःप्रष्टःसप्रतीवप्रारब्धाका
पिनास्तिपरंदुःखदग्धः एवंविचारयामासइतिअप्रस्तुतप्रशंसाज्ञेया ३५ सूर्वस्ववोर्धवैधोषिस्थितिष्ठानांपा
श्चात्यापिविशिष्टतयातस्मरणंअर्थानांयाविरचनाउत्तरोत्तरंसापकावलीमताकथिता ३६ देशाःसम्र

स्वैरंविहरतिस्वैरंपोतेस्वैरंचजल्पति भिक्षुरेकःसुखीलोकेराजचौरभयोज्झितः ३५ सूर्वस्व
वोर्धवैभोषिस्थितिष्ठानामुत्तरोत्तरं अर्थानांयाविरचनाबुधैरेकावलीमता ३६ देशाःसमृद्ध
नगरानगराणिचसप्तभूमिनिलयानि निलयासलीललललनाललनाश्चात्यंतकमनी
याः ३७ प्रत्यक्षाल्लिंगतोयत्रकालत्रितयवर्तिनः लिंगिनोभवतिज्ञानमनुमानंतदुच्यते
३८ ॥
इनग्रंथोस्याउदाहरणं ३७ यत्रप्रत्यक्षाल्लिंगतःकालत्रितयवर्तिनोलिंगिनो
ज्ञानंभवति तदनुमानमुच्यते यथाधूमोलिंगंलिंगीचाग्निःलिंगधूमस्यदर्शनात्लिंगोरग्निरनुमी
यते अनयारीत्यासर्वत्रज्ञातव्यं एतदनुमानंभवति ३८ ॥

वा·
अ·टी·
५५
55

नूनं विभो जिनस्याभिषेकांभसा नयस्तदा भूवन् अन्यथा एतास्तनदीरु जनः स्नानेन कथं शुध्यति नदीस्ना-
नेन शुद्धिर्वेजनन् लिंगं लिंगी विभोरभिषेकांभसा तदा भूवन्निति पक्षप्रतीतानुमानालंकारः ४९ जंभभि-
त् इंद्रः मन्ये ककुप् दिक् पूर्वदिक् तस्यां ज्योतिः स्नेनायं यथाशु शुभ्रं सेनं विजृंभते अदमेवं मन्ये हे सखि-
तः संतापकारी निशाकरः उदेष्यतीत्येतत् विरहिणां सरस्तुरग्रे उक्तपक्षभविष्यानुमानालंकारः ५० ॥

नूनं नयस्तदाभूवन्नभिषेकांभसा विभोः अन्यथा कथमेतासु जनः स्नानेन शुध्यति ४९ जंभ-
भित्ककुभि ज्योतिर्यथाशु शुभ्रं विजृंभते उदेष्यति तथा मन्ये खलः सखि निशाकरः ५० सुरव-
प्रभावाधितकांतिरस्या दोषाकरः किंकरतो विभाति तल्लोचनश्रीहृतिसापराधान्यब्जा-

दोषाकारः चंद्रः अस्या नायिकाया किंकरतां वि (निनो चेत् किमयं क्षिणोति ५१ ॥ भर्ति कर्मकरतां
याति कीदृक् सुरवधूप्रभावाधितकांतिः नो चेत् यदि नेति चंद्रः तल्लोचनश्रीहृतिसापराधानि तासां लो-
चनशोभाहरणात् सापराधानि कमलानि किं क्षिणोति संकोचयति अन्येषु सेवकोतिजाधिपत्येस्य-
नायिकारस्मामन्ये संकोचयत्यो न हेतुश्चेत्यर्थः पक्षः वर्तमानानुमानालंकारो ज्ञातव्यः ५१ ॥

यत्रकुविदेकेकिंचित्साधारणं वस्तु एकत्र अन्यत्र तन्निहत्यै प्रतिपाद्यते यद्वस्तु एकत्र एकस्मिन्स्थाने भवति
अन्यत्र वो रिकानास्ति यत्र बुवानः कृतरोषात् वधूजनात् विभुः नान्यत्र भयं कस्यापीत्यर्थः ४२ यत्र प्रश्ने
१५ तन्निहत्तीर्भवति सापरिसंख्या समुच्यते ४२ यत्र गुरेवागुः परं केवलं पौरमौरभसंपदां वोरः अन्यत्र ५

यत्र साधारणं किंचिदेकत्र प्रतिपाद्यते अन्यत्र तन्निहत्यै सा परिसंख्योच्यते बुधैः ४२ यत्र वा
गुः परं चौरः पौरसौरभसंपदां बुवानश्च कृतक्रोधाद्देव विभुर्वधूजनात् ४३ प्रश्ने यत्रोत्तरं
व्यक्तं गूढं वाप्यथवोभयम् प्रश्नोत्तरं तयोक्तानां संसर्गसंकरं विदुः ४४ अस्मिन्नपारसं
सारसागरे मज्जतां सतां किं समालंबनं साधो रागद्वेषपरित्ययः ४५॥

उत्तरं व्यक्तं गूढं वापि अथवा उभयं व्यक्तगूढात्मकं एतत्प्रश्नोत्तरं ज्ञेयं यत्र यथोक्तानां बहूनामलंका
राणामुक्तानामेकत्र एकहृद्यादिसंसर्गो भवति तं संसर्गालंकारं ज्ञेयः प्रश्नोत्तरोदाहरणमाह ४४ हे
साधो अस्मिन्नपारसंसारसागरे निमज्जतां सतां समालंबनं किं इति प्रश्ने उत्तरं रागद्वेषपरित्ययः एष व्यक्तः प्रश्नो

नाट्यालंकारः ५१॥

वा· कोविदवरभूभृतां राज्ञां स्त्रियो नित्यं क्व वसंति अर्थो ऽसौ भवति पायः को ऽपि यत्नु उत्क्रमपि नत्तायते असौ खड्गे इत्यु
भ·टी· त्तरं एवं गूढप्रश्नोत्तरालंकारः ५८ येभं स्नाख्यं किं दानवारिमदनजलं पत्रिणां कः आख्याति विः पक्षी
५९ यशः कृतो भवति आजितः संग्रामात् गरुडो नित्यं कीदृग् भवति दानवारिविराजितः दानवारि वारिश्रेष्ठे
56 वस्त्रेन विराजितः शोभितः अत्र प्राक् गूढत्वात् पश्चात् च प्रकटत्वात् गूढव्यक्तप्रश्नोत्तरालंकारः ५० ३

क्व वसंति स्त्रियो नित्यं भूभृतां वद कोविद असावतिपायः को ऽपि यउत्क्रमपि नोच्यते ५८ किमे
भं स्नाख्य मां आख्याति पत्रिणां कः कृतो यशः गरुडः कीदृग् यो नित्यं दानवारिविराजितः ५०
वंभेउ स्वतिसभउठस्तुति अमलिणणोपदूसमूहय सिरिवाहडनातितणआसिउदोतस्यसो ५८

दानीं प्रकारकर्त्तेरत्थापनाय वाग्भटाभिधस्य महाकवे महामते श्रुतन्नाम गाथया एकया निदर्शयति
तस्य एकस्याप्यर्थगाथायां मालिदिहस्याप्यौ वाग्भटः श्रीवाहडइति तनय आसीत् कीदृशः यशो ऽपि पुपं:
विरोधालंकारो ऽत्र समवगंतव्यः उक्तं च ते अम्लानमुक्ति संपुटमौक्तिकमणेः प्रभासमूह इव तथाहं श्लोके
शब्दालंकारा यथा नामान कथितास्ते सर्वे व्याख्याताः अन्ये ऽपि ग्रंथेषु बहवो ऽलंकाराः श्रूयंते ते च नोक्ता इत्याद ५८॥
५९

अन्यासामलंक्रियाणामनिबंधनेऽभरणानेनिबंधनंकारणं आचमत्कारितस्यात् उक्तेभ्योऽन्येषांमध्येनको
पिनाटकचमत्कारः चमत्कारंविनाकृष्यतेप्रयासएवस्यात् नफलंकिमपि अथवाउक्तांतर्भावएवच
अनुक्तोउक्तांतर्भवतीत्यर्थः अथरीतिद्वयमाह ४९ असमस्तपदावैदर्भीरीतिः ५० अत्रद्वेएव रीति

अचमत्कारितावास्यादुक्तांतर्भावएवच अलंक्रियाणामन्यासामनिबंधेनिबंधनं ४९ द्वि-
त्रिपदाःपांचालीलाटीयास्समवापंचयावत् प्राह्णाःसमासवंतोभवतियथासंख्यगौडी-
या ५० द्वेएवरीतीगौडीयावैदर्भीचेतिसांतरे एकान्भूयःसमासास्यादसमस्तपदापरा
५१॥

भवतःगौडीयावैदर्भीचेति यतस्तेद्वेसंसारे सांतरेअंतरसहितेपृथक २ लक्षणेनतंदर्शयति
एकागौडीयाबहुसमासास्यात् द्वितीयावैदर्भी असमस्तपदाअसमासोभवेत् ५१॥

वा॰ अथं सिप्रापगा दयः सिप्रानद्या बहुलः कल्लोलकोलाहलो विषमाक्रमेण आक्रमति कीदृशः दर्पोत्पादितत्तुं
मं॰टी॰ गपर्वतपातग्रावप्रपातस्य आस्फालनात् आहननेकूरं यथा भवति आक्रंदति वयानि अतलककक्षपक्षलानि ते
५७ षां ऊँकारप्रकृष्टैः घोरीकृतः कीदृशः नद्याः वर्द्धवर्द्धमानपयसः वर्द्धरोपाहसः कोपि अन्यो वा कोपि मदा

57

दर्पोत्पादितत्तुंगपर्वतपातग्रावप्रपातादिति कूलाक्रंददत्तृक्षकक्षपक्षलझंकारघोरीकृतः वि
षंवर्द्धरवर्द्धमानपयसः सिप्रापगायाः स्फुरन्ताक्रामत्यथमक्रमेण बहुधा कल्लोलकोला
हलः ५ः विप्राः प्रकृत्यैव भवंति लोलालोकोक्तिरेषा नम्रधा करांचित् यद्भुव्यमा
नां मधुपैर्हिजेषाः क्षिप्यत्यथं कैरविरंलीकराग्रैः ५३ ॥

तु तेन वर्द्धमानपयो यस्याः सा तस्या बहुसमासा सा गौडीयारीति ५ः यत् यस्मात्कारणात् द्विजे
षो विप्रश्रेष्ठो वा मधुपैर्मधुपैर्भ्रमरैः यो वृध्यमानां कैरविणीकुमुदिनीकराग्रैः क्षिप्यते श्लेषालंकारः
पक्षाद्वितीयावैदर्भीरीति ५३ ॥

उपसंहारमाह कृतिनाम नसत्व येनार्थेन कवित्वं प्रतिचमत्करोति प्रतिचमत्कारमुत्पादयति इंत इतिवि
चारसंपत्वार्थः तस्मिन कवित्वमनर्थे वस्तुवक्रोक्त्यादिषुण अलंक्रियातेन अभ्यूह्य तां विचार्य तां समाचारीत
यः स्फुटरीतिरसोपेतं प्रतिरसानाह ५४ इति वाग्भटालंकारः परिच्छेदः ४ ॥ यथा साधुपाकेपि

अर्थेन येनाति चमत्करोति प्रायः कवित्वं कृतिनां मनस्तु अलंक्रियाते नमसपवतस्मिन्नभ्यूह्य
तां हृंतदिप्रानयेव ५४ इति वाग्भटः परिच्छेदः ४ साधुपाकेप्यनास्वाद्यं भोज्यं निर्लव
णं यथा तथैव नीरसं काव्यमिति ब्रूमो रसानिह १ विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः
आरोप्यमाण उत्कर्षः स्थायी भावो रसः स्मृतः २॥

भोज्यं लवणारहितं सं अनास्वाद्यं भ
वति तथा काव्यमपि नीरसं रसहीनं अनास्वाद्यं भवति इति पतत्कारणादिह रसान् ब्रूमः १ तेन
वरसाः शृंगारादयः नवानां रसानामेकैकः स्थायी भावः पृथक् २ तेषामी रतिर्हासश्च शोकश्च
क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयश्चामी स्थायीभावाः प्रकीर्तिताः ३॥

अष्टौ क्रमेणैव स्थायिनो भावाः शृंगारहास्यकरुणरौद्रवीरभयानकाः बीभत्साद्भुतशांताश्चेत्येते नव रसाः
क्रमेणैतेषां अथ स्थायिभावलक्षणमाह विशेषेण भावमुत्पादयति रसमिति विभावाः स्त्रीवसंतोद्याना
दयः उत्पत्तिकारणानि यथा शृंगाररसोत्पत्तिरित्यर्थः विभावो रसोत्पत्तिकारणं तथा अनुभूयते लक्ष्यते
रसो यैरित्यनुभावाः कंपस्वेदमुखविकारनेत्रोल्लासादयः रसोत्पत्तौ सत्यां पश्चाद्ये भावा जायंते ते

शृंगारवीरकरुणाहास्याद्भुतभयानकाः
रौद्रबीभत्सशांताश्च नवैते निश्चिता बुधैः ३

ऽनुभावास्तेषां तथा सात्विकाः सात्विकभावाः स्तंभस्वेदरोमांचादयो ऽष्टौ समावगंतव्याः व्यभिचारिणः सहचा
रिणो भावाः धृतिस्मृतिमत्यादयः एभिर्विभावैः सात्विकैः व्यभिचारिभिः उत्कर्षमारोप्यमाणः स्थायीभावो रसः स्या
त् स्थायिभावश्च शृंगारादेरसरूपेण भवति पूर्वोक्ताः स्थायिनो भावा रत्यादयो विभावादिभिर्व्यक्तिकृताः संतो रसाः

शृंगारस्वरूपमाह जायापत्योः कलत्रभर्त्रोरत्यां प्रीत्यामिछावृत्तिः परस्परवर्णनं शृंगारोयंउच्यते एष
शृंगारो द्विविधो मतः कथं संयोगो विप्रयोगश्च संयुक्तयोर्दंपत्योः संभोगात्मकः शृंगारः वियुक्तयोस्तु
विप्रलंभात्मकः शृंगारः तौ संयोगविप्रलंभौ तयोः जायापत्योः क्रमात् युक्तवियुक्तयोः बुधैः वाच्यौ भ
वतः पुनरेष शृंगाररसो द्विधा मतः प्रच्छन्नश्च प्रकाशश्च विशेषमग्रतो ज्ञापयिष्यामः ५ अथ शृंगारर

जायापत्योर्मिथो रत्यां वृत्तिः शृंगार उच्यते संयोगो विप्रयोगश्चेत्येवं द्विविधो मतः ४ तौ त
योर्भवतो वाच्यौ बुधैर्युक्तवियुक्तयोः प्रच्छन्नश्च प्रकाशश्च पुनरेष द्विधा मतः ५ रूपसौभा
ग्यसंपन्नः कुलीनः कुशलो युवा अनुद्धतः सूनृतगीः ख्यातो नेता च सद्गुणः ६ अथ चविध
धैरश्चोऽनुकूलः दक्षिणः धृष्टः शठश्चेति चतुर्धा स्यान्नायिकास्याष्टविधा ।१।

मत्तायकमा ...२ अथ शृं
गारे नेता नायकः कथितः कीदृशो रूपसौभाग्ययुक्तः रूपशब्देन लावण्यं कुलीनः सत्कुलोद्भवः कुशलः सक
ललीलाकोविदः युवा यौवने वर्त्तमानः अनुद्धतः सौम्याकृतिक्रियः सूनृतगीः सत्यवाक् सद्गुणः ६ अथ च
नायिको विबुधैः चतुर्धा उक्तः अनुकूलः दक्षिणः धृष्टः शठश्चेति अस्य नायकस्य नायिका चतुर्विधा स्यात् ।१।

र॰
म॰ टी॰
५९
59

अथानुकूलादीनां लक्षणान्याह अनुकूललक्षणं प्रागाह नीलीरोगानुकूलो भवति यथा नीली तस्या रा
गो नीतरतः सोऽनुकूलो नायकः परेरमणीरतो न स्यात् अन्यस्यां चित्तं यस्य सोऽन्यचित्तः स दक्षिणो भ
ति कीदृक् स्त्रियां अविकृतः स्वपत्न्यां विकारं मारणेन्यजन ऊहनादिकं न दर्शयति इत्यर्थः ८ तथा यो विकृतो

नीलीरागोऽनुकूलः स्यादनन्यरमणीरतः दक्षिणश्चान्यचित्तोऽपि यः स्यादविकृतः स्त्रियां ८ प्रि
यं वक्त्यप्रियं तस्याः कुर्वन्यो विकृतः शठः धृष्टो ज्ञातापराधोऽपि न विलक्षोऽवमानितः ९ अनू
ढा च स्वकीया च परकीया पणांगना त्रिवर्गिणः स्वकीया स्यादन्या केवलकामिनः १०॥

विकारमापन्नः तस्याः स्वपत्न्याः अप्रियं कुर्वन् प्रियं वक्ति स शठो नायकः यो ज्ञातापराधोऽपि अवमानि
तोऽपि विलक्षो न भवति स धृष्टो नायको ज्ञेयः ९ अथ सामान्येन चतुर्विधा स्त्रिय उच्यन्ते यथा शृंगाररसस्य नाय
कोयुवाउमानूप्राक्कथितः तस्य नायकस्य पुरुषरूपस्य नायिकापि चतुर्विधा भवति ता आह स्त्रियश्चतुर्विधा १०॥

५९

अनूढा स्वकीया परकीया पण्यांगना चेति त्रिवर्गिणो यमी र्थकामधुकस्य स्वकीया परिणीता स्यात् आयाति
सः केवलकामिनो नरेण अनुरक्तया या स्वयं स्वीकृता भवति सा अनूढेत्युच्यते यथा दुष्यंतस्य शकुं
तला या नायिका ११ प्रधान चारित्रवती १२ परकीया परस्त्री अनूढैव वाच्यपरमनयोः परकीया अनूढ

अनुरक्तानुरक्तेन स्वयं या स्वीकृता भवेत् सानूढेति यथा राज्ञो दुष्यंतस्य शकुंतला ११ देव
तागुरुसाक्ष्येण स्वीकृता स्वीयनायिका क्षमावत्यतिगंभीरप्रकृतिः सच्चरित्रभृत् १२ परकी
याप्यनूढैव वाच्यभेदोस्ति वानयोः स्वयमप्यातिकामैका सख्यैवैका प्रियं वदेत् १३ सा
मान्यवनिता वेश्या भवेत्कपटपंडिता नहि कश्चित्प्रियस्तस्याः दातारं नायकं विना १४॥

योवाच्यभेदोस्ति न तादृशविशेषः कोपि तथापि विशेषमाह एका परकीया अतिकामाकुलवती स्वयमपि प्रि
यं वदेत् एका द्वितीया अनूढा लज्जया स्वयमवदेत् परं कामाकुला धात्रीसख्यादिवक्त्रा प्रियं वदेत् १३ सामान्य
वनिता कपटपंडिता वेश्या पण्यांगना भवेत् तस्या दातारं नायकं विना न हि कश्चित्प्रियो भवति यो दाता स एव

अथ शृंगारस्य प्रकाशप्रछन्नभेदद्वयमाह यथापरस्याउद्धता सर्वप्रकाशमेव सर्वप्रकटमेव नायकं प्रतिया
ति प्रकाशो रसः अन्यस्त्रीणां तिसृणां प्रियसमागमः प्रछन्न एव भवति यथः प्रछन्नः शृंगाररसः समासतः सं
भोगशृंगारविप्रलंभशृंगारमाह १५ पूर्वानुरागात्मको विप्रलंभः मानात्मको विप्रलंभः प्रवासात्मको वि

सर्वप्रकाशमेवैषा याति नायकमुद्धता वाच्यः प्रछन्न एवान्यस्त्रीणां
प्रियसमागमः १५ पूर्वानुरागमानात्मप्रवासकरुणात्मकः विप्र॰
लंभः चतुर्धा स्यात्सर्वस्पूर्वोस्य यं गुरुः १६ स्त्रीपुंसयोर्नवालोकादे॰
वोल्लसितरागयोः ज्ञेयः पूर्वानुरागोयमपूर्णस्पृहयोर्दशा १७ ॥

प्रलंभः करुणात्मको विप्रलंभः इति विप्रलंभश्चतुर्धा अयं विप्रलंभः सर्वः पूर्वो गुरुः मानात्पूर्वानुरा
गो गुरुः प्रवासात्मानो गुरुरित्यर्थः १६ अथ क्रमेण एतेषां लक्षणान्याह स्त्रीपुंसयोर्नवालोकादेव नव
दर्शनादेवोल्लसितरागयोः परमपूर्णस्पृहयोर्दशा ३ वस्था अथ पूर्वानुरागविप्रलंभशृंगाररसः १७ ॥

तथापत्युरन्यवनितासंगात् पत्न्यावाईर्ष्याविकृतिरीर्ष्यायाविकारोभवति मानात्मकोविप्रलंभशृंगारर
सः तथापरदेशस्थेभर्तरिपत्न्याविरहसंभवः प्रवासात्मकविप्रलंभशृंगारोरसः १८ अनुकूलयोर्दंपत्योर्जा
यापत्योरेकतरंपंचत्वेद्वयोरेकतरविनाशेकरुणात्मकोविप्रलंभशृंगारोरसः सहृत्तवर्णनेएवभवति अन्ये

मानोन्यवनितासंगादीर्ष्याविकृतिरुच्यते प्रवासःपरदेशस्थेप्रियेविरहसंभवः १८ स्यादे-
कतरपंचत्वेदंपत्योरनुरक्तयोः शृंगारःकरुणाख्योयंहृत्तवर्णनएवसः १९ उत्साहा-
त्माभवेद्वीरस्त्रेधाधर्माजिदानतः नायकोत्रभवेत्सर्वैःश्लाघ्योरथिगतोगुणैः २० ॥

हास्याद्भुतादयोरसावृत्तेःश्लोकेवासंभवंति अयंतुशृंगारकरुणाख्योरसोवृत्तवर्णनेसंभवति पूर्णे
प्रबंधेभवति यथारतिविलापःकुमारसंभवे शृंगाररसंतत्संबंधंवान्यदपिसर्वम् उत्कावीरादीन्र
सानाह १९ वीरोरसउत्साहात्मकोभवति सत्रिधाधर्माजिदानतः धर्मवीरःसंग्रामवीरःदानवीरइ
ति अत्रवीररसःसर्वैःश्लाघनीयगुणैरथिगतोनायकोभवति २० ॥

करुणो नाम रसः शोकोत्थः शोकात्मको ज्ञातव्यः तत्र रसे भूपातरोदने विवर्ण्यमोहनिर्वेदप्रलापास्तूणि कीर्त्तये
त् भूपातो भूलोठनं विवर्ण्य विवर्णभावः मोहो मौढ्यं निर्वेदो विवादः प्रकृष्टलपनं अस्तूणि अस्तुपातः क
रुणरसे एते भवंति भावाः अतो अत्र रसे एते भावा वर्ण्यंते २१ तस्य हास्यरसस्य संभवउत्पत्तिः चेष्टांगविष
विकृत्याद्भवति अथोत्तममध्यमाधमभेदेन हास्यरसस्वरूपमाह २२ सहास्यरसो महात्मना स्मितमातो

शोकोत्थः करुणो ज्ञेयस्तत्र भूपातरोदने वैवर्ण्यमोहनिर्वेदप्रलापास्तूणि कीर्त्तयेत् २१ हास्यमू
लः समाख्यातो हास्यनामा रसो बुधैः चेष्टांगवेषवैकृत्याद्वाच्यो हासस्य चोद्भवः २२ कपोला
दिकृतोल्लासो भिन्नोष्ठः स महात्मना विदीर्णास्यश्च मध्यानामधमानां सशब्दकः २३ विस्म
यात्माद्भुतो ज्ञेयः स चासंभाव्यवस्तुनः दर्शनाच्छ्रवणाद्वापि प्राणिनामुपजायते २४ ॥

कपोलादिकृतोल्लासमत्रभिन्नोष्ठमात्रश्च भवति समध्यमानां विदीर्णास्याः प्रसृतामनो भवति स च हास्य
रसो नराधमानां नीचानां सशब्दः सद्दच्छब्दसहितो भवति २३ अद्भुतो रसो विस्मयः स्थायिभावात्मकः स च
प्राणिनां असंभाव्यवस्तुनो दर्शनात् श्रवणाद्वा समुपजायते एतेनास्य द्विधोत्पत्तिरभिहिता २४ ॥

अस्यरसस्यविभावादीन्दर्शयति तत्राद्भुतरसेजाते नेत्रयोर्विकासःस्यात् रोमांचस्वेदेचभवतः निस्पंदने
त्रताभवति साधुसाधुवाग्भवति गीर्गद्गदाचस्यात् २५ भयानकोरसोवस्तुनोघोरदर्शनात् भवेत् भीति
प्रकृतिर्भयस्वभावः सभयानकोरसः प्रायेणस्त्रीषुनीचेषुबालेषुप्रकाश्यते भयरसोव्यावर्ण्यमानोन्

तत्रनेत्रविकासःस्यात्पुलकंस्वेदएवच निस्पंदनेत्रतासाधुसाधुवाग्गद्गदाचगीः २५ भया
नकोभवेद्भीतिप्रकृतिर्घोरवस्तुनः सचप्रायेणवनितानीचबालेषुशस्यते २६ दिग्गालोका
(स्यशोषांगकंपगद्गदसंभ्रमः त्रासवैवर्ण्यमोहाश्चवर्ण्यंतेविबुधैरिह २७॥

नमेतेषुवपुणोमते नान्यत्रास्यदी॰
प्तिः २६ इदानीमस्यविभावादीन्दर्शयति अस्माद्भयानकात् एतेपदार्थाउत्पद्यते अतोत्ररसेगतेव्यावर्ण्य
ते एतेके दिग्गालोकोदिग्दर्शनं मुखशोषः गात्रकंपः गद्गदावाणीसंभ्रमः तेषांत्रासः वैवर्ण्यंविव॰
र्णभावः मोहोमूढतासर्वत्रमुखतेभयेन इहामीव्यावर्ण्यतेबुधैर्भावाः २७॥

रौद्रोरसः क्रोधात्मको भवति क्रोधश्चारिपराजयात् अरिकृतपराजयात् क्रोधात् यद्वा योः रिणा पराजीय-
ते तद्वात् स्य क्रोधो जायत इत्यर्थः तथा रौद्र भीष्मवृत्तिरुग्रः सामर्षो नरो नायको भवेत् २८ स्वांशाख्यात
इत्यादि श्लोकः सुगमएव २९ वीभत्सो जुगुप्सातो जुगुप्साभावः स्यात् विभावादित्रयस्योदाहरणं दि-

क्रोधात्मको भवेद्रौद्रः क्रोधश्चारिपराभवात् भीष्मवृत्तिर्भवेदुग्रः सामर्षस्तत्र नायकः २८
स्वांशाख्यातः स्वधर्मसाक्षात्त्वेपशुरुदयस्तथा [illegible]राति जनताचेपोदलनं चोपवर्ण्यते २९
वीभत्सः स्याज्जुगुप्सातः सोवद्यश्रवणेक्षणात् निष्ठीवनास्यभंगादिस्यादत्र मदता नच ३०
सम्यग्ज्ञानसमुत्थानः शान्तो निस्पृहनायकः रागद्वेषपरित्यागात्सम्यग्ज्ञानस्य चोद्भवः ३१॥

प्राति मचावद्यश्रवणात् विरूपपदार्थाकर्णत्वात् विरूपवस्तुनो दर्शनात् निष्ठीवनं आस्यभंगादिः
स्यात् तद्वि संपन्न स्यात् पदं मदता मतमानां निष्ठीवनादयोभावा न प्रयोक्तव्या ३० शान्तो रसः सम्यग्ज्ञा-
नसमुत्थानो भवति अस्य शान्तरसस्य निस्पृहनायकः रागद्वेषपरित्यागः सम्यग्ज्ञानस्य चोद्भवः ३१

सारस्वताध्यायिनः कविस्रष्टारः आकल्पकालं कल्पकालं यावत् काव्यपुरुषं रचयंतु कीदृग्विशेषा
णानि सर्वांगानि इति वाग्भटालंकारावचूरिः ल्लाटी हास्यरसे प्रयोगानि पुराणे रीति प्रबंधे कृता पांचाली
करुणाभयानकरसे प्रणेतारसे मागधीः गौडी वीररसेन रौद्रजरसे वच्छोमदे पोद्भवा वीभत्साद्भुतयो विद

दोषैरुज्झितमाश्रितं गुणगणैश्चेतश्चमत्कारिणं नानालंकृतिभिः परीतमभितो रीत्या स्फुर
न्त्या सताम् तैस्तैस्तन्मयतां गतं नवरसैराकल्पकालं कवि स्रष्टारो रचयंतु काव्यपुरुषं सा
रस्वताध्यायिनः ३२ इति श्रीवाग्भटालंकारे पंचमः परिच्छेदः ५ ॥ शुभम् ॥

र्भविषयो शृंगारभूते रसे द्वित्रिपदा पांचाली लाटीया पंचसप्तयावत् प्राज्ञा समासवंतो भवंति यथाश
क्ति गौडीयाः प्रथमपदाद्वन्सामी त्रिपदसमासा च मागधी भवति उभयोरपि विदर्भा मुद्रुर्मुद्रुर्भाषणांकुरु
ते ३२ इति श्रीवाग्भटालंकारटीकायां ग्रंथः समाप्तः ॥ भद्रम् ॥

का नाम